कदि ८०९, क्रदि ८१०, क्लदि ८११ वैक्लव्ये। वैकल्ये इत्येके। त्रयोऽप्यनिदित इति नन्दी। इदित इति स्वामी। कदि क्रदी इदितौ क्रद क्लद इति चानिदिताविति मैत्रेयः। कदिक्रदिक्लदीनामाह्वानरोदनयोः परस्मैपदिषूक्तानां पुनरिह पाठो मित्त्वार्थ आत्मनेपदार्थश्च ॥

809. √Kadi, 810. √Kradi, 811. √Kladi, to be confounded or perplexed, to confound. Some read it as वैकल्ये। According to Nandi, all these three roots are without the indicatory इ। According to Swamî they have an indicatory इ। According to Maitreya कदि and क्रदि have an indicatory इ; while क्रद and क्लद are without it. These three roots have been read in the Parasmaipada subclass. See *ante*. Their repetition here is for the sake of showing that they are मित् and also atmanepadî. Pre. कन्दते। Per. चकन्दे। I Fut. कन्दिता। Pass. कन्द्यते। *Aor.* अकान्दि or अकन्दि। Namul. कन्दंकन्दं or कान्दंकान्दम्। Caus. कन्दयति, कन्दयते। *Aor.* अचकन्दत्। Desi चिकन्दिषते। Inten. चाकन्द्यते। Yan luk. चाकन्ति ॥

810. √Kradi, to confound. Pre. क्रन्दते। Per. चक्रन्दे। I Fut. क्रन्दिता ॥

811. √Kladi, to confound. When these three roots are अनिदित् then we have कदयति, अकादि &c. Pre. क्लन्दते। Per. चक्लन्दे। I Fut. क्लन्दिता। Nouns. कन्दनं। कन्दलः। कदली ॥

ञित्वरा ८१२ संभ्रमे। घटादयः षितः। षित्त्वादङ् कृत्सु वक्ष्यते ॥

812. √ñitvarâ, to hurry, make haste. Pre. त्वरते। Per. तत्वरे। I Fut. त्वरिता। Pass. त्वर्यते। *Aor* अत्वरि or अत्वारि। Namul त्वरंत्वरं or त्वारंत्वारं। Caus. त्वरयति। त्वरयते। *Aor.* अतत्वरत्। Desi तित्वरिषते। Inten. तात्वर्यते। Yan luk तातूर्ति। तातूर्तः। तातरीषि। तातूर्षि। तातूर्यः। तात्वरीमि। तातूर्मि। Imperative तातूर्हि। Past. Part. Pass त्वरितः or तूर्णः। Nouns. तूः, तुरा ॥

Here end those Ghatâdi roots which are षित्। *The force of* षित् *will be mentioned hereafter in the krit subdivision.*

अथ फणान्ताः परस्मैपदिनः ॥

Sub-section. Now the roots that are given here after upto फण, *are Parasmaipadi*

ज्वर ८१३ रोगे। ज्वरति। जज्वार ॥

813. √Jvara, to be diseased, to be feverish. Pre. ज्वरति। Per. जज्वार। I Fut. ज्वरिता। II Fut. ज्वरिष्यति। Imperative. ज्वरतु। Imper. अज्वरत्। Pote. ज्वरेत्। Bene. ज्वर्यात्। Aorist. अज्वारीत्। Condi. अज्वरिष्यत्। Pass. ज्वर्यते। *Aor.* अज्वारि or

अज्वारि । Caus. ज्वरयति, ज्वरयते । *Aor.* अजिज्वरत् । Desi. जिज्वरिषति । Inten. जाज्वर्यते । Yaṅ luk जाजूर्त्ति, जाजूर्त्तः । Past. Part. Pass. ज्वरितः । ज्वरितवान् । Nouns. जूः, जुरौ, जुरः । संज्वारी ॥

गड ८१४ सेचने । गडति । जगाड ॥

814. √Gaḍa, to distil, draw out. Pre. गडति । Per. जगाड । I Fut. गडिता । Pass. गड्यते । *Aor.* अगाडि or अगडि । Caus. गडयति, गडयते । *Aor.* अजीगडत् । Desi. जिगडिषति । Inten. जागड्यते । Yaṅ luk जागड्डि । Nouns. गडुलः ॥

हेड ८१५ वेष्टने । हेडृ अनादरे इत्यात्मनेपदिषु गतः स एवोत्सृष्टानुबन्धोऽनूद्यतेऽर्थविशेषे मित्त्वार्थम्। परस्मैपदिभ्यो ज्वरादिभ्यः प्रागेवानुवादे कर्तव्ये तन्मध्येऽनुवादसामर्थ्यात्परस्मैपदम्। हेडति। जिहेड । हिडयति । अहिडि–अहीडि। अनादरे तु हेडयति ॥

815. √heḍa, to surround. The root हेड अनादरे is âtmanepadi. That very root without its indicatory ऋ is repeated here for the sake of including it in the मितत्व class. That root ought to have been included in the preceding list which gives atmanepadi roots, and not here in the Parasmaipadi subdivison? The very fact of its so given here shows that it is Parasmaipadi also. Pre, हेडति । Per. जिहेड। I Fut. हेडिता Pass. हेड्यते । Aor. अहिडि or अहीडि । Caus. हिडयति, Aor, अजीहिडत् । But from the root हेडृ अनादरे (No. 304) we have हेडयति । Desi. जिहेडिषति ॥

वट ८१६ भट ८१७ परिभाषणे। वट वेष्टने भट भृतौ इति पठितयोः परिभाषणे मित्त्वार्थोऽनुवादः ॥

816. √vaṭa. 817 √bhaṭa to speak, converse. These two roots have already been taught before in वट वेष्टने no 322, and भट भृतौ no 329. They are repeatedly here, in order to give them the additional meaning of paribhâshaṇa; and make them मित् । Caus. वटयति । भटयति । No lengthening. Aor. अवटि or अवाटि । अभटि or अभाटि ॥

नट ८१८ नृतौ। इत्थमेव पूर्वमपि पठितं तत्रायं विवेकः। पूर्वं पठितस्य नाट्यमर्थः। यत्कारिषु नटव्यपदेशः। वाक्यार्थाभिनयो नाट्यम्। घटादौ तु नृत्तं नृत्यं चार्थः। यत्कारिषु नर्तकव्यपदेशः। पदार्थाभिनयो नृत्यम्। गात्रविक्षेपमात्रं नृत्तम्। केचित्तु घटादौ नट नतौ इति पठन्ति। गतौ इत्यन्ये। णोपदेशपर्युदासवाक्यभाष्यस्ता नाटि इति दीर्घपाठाद्घटादिर्णोपदेश एव ॥

818. √naṭa to dance. This root has also been taught before. See No. 332. The difference is this, the root taught before means nâṭyam or dramatic representation: and a person who does that is called naṭa 'an actor.' The representation on the stage by spoken words to express the sense of something is nâṭyam or drâma. But the root given here means to dance, the appropriate verbal nouns being nṛityam or nṛittam, and not nâṭyam. The person who does this is called नर्तकः 'a dancer', and not नटः 'an actor'. The difference between nṛityam and nṛittam is this. Representing of an action or object such as by pantomime or gesticulation is nṛityam; while nṛittam is dancing pure and simple, mere movement of the body.

Some read नट नतौ 'to bend, to bow"; in the Ghaṭâdi list, and say the ghaṭâdi naṭa means to bow. They give the illustration नटयति शाखा 'He causes the branch to bend'. Others say that it means to go.

The gkaṭâdi naṭa (*i. e*, the present root) is to be understood to have been eunnciated with an initial ण, that is it is णट नृत्तौ । The reason for this is that in the exceptions to the roots that are taught with an initial ण, the author of the Mâhabhâshya gives नाटि, i. e the nâta with long आ । The मित root can never have long आ in the causative. See VI. 1. 65. already gone before. In other words, the present root नट andthe root no 342 are both णोपदेश andthe Churâdi root नट is not so and is the root mentioned in sûtra VI. I. 65.

Note :—The representation on scene may be by words (vâkyârtha-abhinaya) and then it is drama or **nâṭyam.** Or it may be by gesticulation without words (padártha abhinaya), and then it is called nṛityam. Or there may be no representation at all, but mere rhythmic movements of limbs according to rules and then it is called nṛitta. Their respective nouns are naṭa 'an actor,' and narttaka 'a pantomime' or 'a dancer.'

The Causative of the Ghaṭâdi नट is नटयति 'he causes to dance' The aorist is अननटि or अनाटि ॥

ष्टक ८१९ प्रतीघाते । स्तकति ॥

819. √Shṭaka to resist, repel, push back, strike against. Pre. स्तकति । Per. तस्ताक । I Fut. स्तकिता । Caus. स्तकयति, स्तकयते । Aor. अतिष्टकत् । Pass aor अस्तकि or अस्ताकि । Desi. तिस्तकिषति । Inten. तास्तक्यते । Yaṅ luk तास्तक्ति ॥

चक ८२० तृप्तौ । तृप्तिप्रतीघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्त्वार्थोऽनुवादः । आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदम् ॥

820. √Chaka to be satiated, satisfied. This root has already been taught before as चक तृप्तौ प्रतिघाते । No. 93. 'to be satisfied', and 'to resist.' It is âtmanepadî there. It is repeated here in order to make it a मित् root, and then to confine its meaning to satisfaction only. It is moreover Parasmaipadi now; because of its repetition in this list. Pre. चकति । Per. चचाक । I Fut चकिता । Aorist अचाकीत् or अचकीत् । Caus. चकयति, चकयते । Aor. अचीचकत् । Pass. aor. अचकि or अचाकि ।

कखे ८२१ हसने । एदित्वान्न वृद्धिः । अकखीत् ॥

821. √Kakhe to laugh. As it has an indicatory ए, there is no Vṛiddhi in the aorist. As अकखीत् । Pre. कखति । Per. चकाख । चकखतुः । I Fut कखिता । Aorist अकखीत् । Caus. कखयति, कखयते । Pass. Aor. अकखि or अकाखि । Desi चिकखिषति । Inten. चाकख्यते । Yaṇ luk चाकक्ति ॥

रगे ८२२ शङ्कायाम् ।

822. √Rage to doubt. Pre. रगति । Per. रराग ॥

लगे ८२३ संगे ।

823. √Lage to adhere or stick to. Pre. लगति । Noun लग्नः ॥

ह्रगे ८२४, ह्लगे ८२५, षगे ८२६, ष्ठगे ८२७ संवरणे ।

824. √Hrage. 825 √Hlage, 826 √Shage, 827 √Shṭhage 'to hide, cover.' Some read स्थगे instead of ष्ठगे । But it is incorrect, Pre. ह्रगति । Per. जह्राग ।

Aorist अह्रगीत् । Caus. ह्रगयति, ह्रगयते । Aor. अजिह्रगत् । Pass. Aor. अह्रागि । c अह्रगि । Desi. जिह्रगिषति । Inten. जाह्रग्यते । Yan luk जाह्रक्ति ॥

825, √Hlage, Pre. ह्लगति । Per. जह्लाग । I Fut. ह्लगिता । Aorist अह्लगीत् ॥

826. √Ṣhage, Pre. सगति । Per. ससाग । सेगतुः । सेगुः । Aorist असगीत् । Caus. सगयति, सगयते । Aor. असीसगत् । Pass. Aor. असगि or असागि । Desi. सिसगिषति । Inten. सासग्यते । Yan luk सासक्ति ॥

827. √Ṣhṭhage Pre. स्थगति । Per. तस्थाग । I Fut. स्थगिता । Aorist. अस्थगीत् । Caus. स्थगयति, स्थगयते । Aor. अतिस्थगत् । Pass. Aor. अस्थगि or अस्थागि । Desi. तिस्थगिषति । Inten. तास्थग्यते । Yan luk तास्थक्ति ॥

कगे ८२८ नोच्यते । अस्यायमर्थ इति विशिष्य नोच्यते । क्रियासामान्यार्थत्वात् । अनेकार्थत्वादिन्ये ॥

828. √Kage to act, perform. The word no'chyate means 'nothing is said That is we do not give any specific meaning to the √Kage, because it denotes action in general. Some say it has many meanings and therefore no particular meaning is assigned. Pre. कगति । Per. चकाग । I Fut. कगिता । Aorist अकगीत् । Desi. चिकगिषति ॥

अक ८२९, अग ८३० कुटिलायां गतौ ।

829. √Aka, 830 √Aga. To go or move tortuously like a serpent. Pre. अकति । Per. आक । I Fut. अकिता । Aorist आकीत्, as मा भवानकीत् । Caus. अकयति । Aor. मा भवान् अचकत् । Pass. Aor. मा भवान अकि or आकि । Desi. अचिकिषति ॥

830. √Aga, Pre. अगति । Per. आग । I Fut. अगिता । Aorist आगीत् । Caus. अगयति, अगयते । Desi. अजिगिषति ॥

कण ८३१, रण ८३२ गतौ । चकाण । रराण ॥

831. √Kaṇa, 832 √Raṇa to go, to move, These two roots have the meaning 'to make noise' also. See Nos. 476 and 472. When they have that sense their causative is काणयति and राणयति । Pre. कणति । Per. चकाण । I Fut. कणिता । Caus. कणयति, कणयते । Pass. Aor. अकणि or अकाणि । Desi चिकणिषति ॥

832. √Raṇa, to go. Pre. रणति । Per. रराण । I Fut. रणिता । Caus. रणयति । रणयते ॥

चण ८३३, शण ८३४, श्रण ८३५ दाने च । शण गतौ इत्यन्ये ॥

833. √Chaṇa, 834 √Śaṇa, 835 √Sraṇa. To go as well as to give. According to some √Śaṇa means to go. Pre. चणति । Per. चचाण । चेणतुः । चेणुः I Fut. चणिता । Aorist अचाणीत् or अचणीत् । Caus. चणयति, चणयते । Aor. अचचणत् । Pass. Aor. अचणि or अचाणि । Desi. चिचणिषति । Inten चाचण्यते । Yan luk चञ्चण्टि ।

834. √Śaṇa, Pre. शणति । Per शशाण । I Fut. शणिता । Aorist अशणीत् । अशाणीत् ॥

835. √Śraṇa, Pre. श्रणति । Per. शश्राण । I Fut. श्रणिता । Aorist अश्राणीत् । अश्रणीत् ॥

श्रथ (श्नथ) ८३६, (क्नथ) श्लथ ८३७, क्रथ ८३८, क्लथ ८३९ हिंसार्थाः । जासिनिप्रहण-(६१७) इति सूत्रे क्राथेति मित्त्वेऽपि वृद्धिर्निपात्यते । क्राथयति । मित्त्वं तु निपातनात्परत्वात् चिण्णमुलोः-(२७६२) इति दीर्घे चरितार्थम् । अक्रथि-अक्राथि । क्रथं क्रथम् । क्राथं क्राथम् ॥

836. √Ślatha (√Śnatha), 837 √Ślatha (√Knatha) 838 √Kratha, 893 √Klatha. To injure. Though the root √क्रथ is a मित root, yet it takes vṛiddhi in the Causative, because it has been particularised so in the sûtra II. 3. 56. S. 613. As क्राथयति । The मित् operation takes place on this root in the चिण् and णमुल् affixes by VI. 4. 93 S. 2762, because that is a sûtra subsequent to the nipâtana sûtra II 3. 56. This मित् causes the lengthening before चिण् and णमुल् । As अक्रथि or अक्राथि । क्रथंक्रथम् or क्राथंक्राथम् । Pre. श्रथति । Per. शश्राथ । I Fut. श्रथिता । Caus. श्रथयति, श्रथयते । Aor. अशिश्रथत् । Pass. aor. अश्रथि or अश्राथि । Desi. शिश्रथिषति । Inten. शाश्रथ्यते । Yaṅ luk शाश्रत्ति ॥

837. √Ślatha, Pre. श्लथति । Per. शश्लाथ । I Fut. श्लथिता । Desi. शिश्लथिषति । Inten. शाश्लथ्यते ॥

838. √Knatha, to injure. Pre. क्नथति । Per. चक्नाथ । I Fut. क्नथिता ॥

839. √Klatha, Pre. क्लथति । Per. चक्लाथ । I Fut. क्लथिता ॥

'वन ८४० च' । हिंसायामिति शेषः ॥

840. √Vana (chana) to injure. By the force of the word च, the meaning of 'to injure' is drawn into it from the last. Some read it as √Chana, Pre. चनति । Per. चचान । I Fut. चनिता । Caus. चनयति, चनयते । Pass. Aor. अचनि or अचानि ॥

वनु च ८४१ नोच्यते । 'वनु' इत्यपूर्व एवायं धातुर्न तु तानादिकस्यानुवादः । उदित्करणसामर्थ्यात् । तेन क्रियासामान्ये वनतीत्यादि । प्रवनयति । अनुपसृष्टस्य तु मित्त्वविकल्पो वक्ष्यते ॥

841. √Vanu. And √Vanu also is not mentioned. That is to say that this √Vanu is an original root and not a repetition of the Tanâdi root √Vanu to beg (VIII. 8). This we say because this √Vanu has an indicatory उ and scope must be given to it. For had it been merely a repetition of the Tanâdi √Vanu, that root has already an indicatory उ so that letter need not have been repeated here. The conjugation is वनति and not वनुते । With a preposition we have प्रवनयति without lengthening. When the root does not take any preposition, it is optionally मित् and then the Causative is वनयति or वानयति । See Gaṇa sûtra ग्लास्नावनुवमां च lower down. The root √Vanu means action in general. Pre. वनति । Per. ववान । I Fut. वनिता । Caus. प्रवनयति । Aor. प्रावीवनत् । Pass. Aor. प्रावनि or प्रावानि ॥

ज्वल ८४२ दीप्तौ । णप्रत्ययार्थं पठिष्यमाण एवायं मित्त्वार्थमनूद्यते । प्रज्वलयति ॥

842. √Jvala to shine. With this root also begins a sub-class called jvalâdi which by III. 1. 140 take ण in forming verbal nouns, and it will be taught later on, see No. 884. That root, to be taught subsequently, is repeated here in order to make it मित् । As प्रज्वलयति । When it does not take a preposition it is optionally मित् । See Gaṇa Sûtra later down. Pre ज्वलति । Caus. प्रज्वलयति । Pass. Aor. प्राज्वालि or प्राज्वलि ॥

ह्वल ८४३, ह्मल ८४४ चलने । प्रह्वलयति । प्रह्मलयति ॥

843. √Hvala, 844 √Hmala to walk, move, Pre. ह्वलति । Per. जह्वाल ।

I Fut. ह्वलिता । Aorist. अह्वालीत् । There is no optional vṛiddhi. See VII. 2. 2. Caus. प्रह्वलयति । Without any preposition the root is optionally मित् । See below, Aorist. Pass. प्राह्वलि or प्राह्वालि । Desi. जिह्वलिषति । Inten. जाह्वल्यते । Yaṅ luk जाह्वल्ति ॥

844. √Hmala, Pre. ह्मलति । Per. जह्माल । I Fut. ह्मलिता ॥

'स्मृ ८४५ आध्याने' । चिन्तायां पठिष्यमाणस्य आध्याने मित्वार्थोऽनुवादः । आध्यानमुत्कण्ठापूर्वकं स्मरणम् ॥

845. √Smṛi. To remember with regret or anxiety. This root is taught further on in the sense of 'remembering.' It is repeated here for the sake of making it मित् when it has the sense of remembering with regret. Adhyâna means 'remembering with anxiousness.' Pre. स्मरति । Caus. मातुः स्मरयति । Pass. Aor. अस्मरि or अस्मारि ॥

दॄ ८४६ भये । 'दॄ विदारणे' इति क्र्यादेरयं मित्वार्थोऽनुवादः । दॄणन्तं प्रेरयति दरयति । भयादन्यत्र दारयति । धात्वन्तरमेवेदमिति मते तु दारतीत्यादि । केचिद्घटादौ 'अत्स्मृदॄत्वर–' (२५६६) इति सूत्रे च 'दॄ' इति दीर्घस्थाने ह्रस्वं पठन्ति तच्चेति माधवः ॥

846. √Dṛi to fear. Deva, Dhanapala and Purṇa Chandra are of opinion that this is an original root. But Maitreya holds that it is the same root as दॄविदारणे 'to burst' of the Kryâdi class No. 23 and that it is repeated here to give it the designation of मित् । This is the opinion endorsed by the anthor of Siddhanta. Thus the causative दरयति means दॄणन्तं प्रेरयति "Causes to burst or split up'. When it has not the meaning of fear, we have दारयति । According to those who hold it to be a Bhuâdi root, it is conjugated as दरति &c. Some read this root as दृ with a short ऋ in the sûtra VII. 4 95 S. 2566 instead of long ॠ ॥ But that is wrong according to Mâdhava. Pre. दरति Per ददार । दद्रतुः or ददरतुः । I Fut. दरिता । Caus दरयति ॥

नॄ ८४७ नये । क्र्यादिषु पठिष्यमाणस्यानुवादः । नयादन्यत्र नारयति ॥

847. √Nṛi to lead. This is a repetition of the root which will be taught in the Kryâdi class. When the meaning is not that of to lead, the causative is नारयति । See Kryâdi No. 25 Pre. नरति or नृणाति । Per. ननार । I Fut. नरिता । Aorist. अनारीत् । Caus. नरयति । Pass. Aor. अनरि or अनारि ॥

श्रा ८४८ पाके । श्रै इति कृतात्वस्य 'श्रा' इत्यदादिकस्य च सामान्येनानुकरणम् ॥

× लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ×

× लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् × इति परिभाषाभ्याम् । श्रपयति विक्लेदयतीत्यर्थः । पाकादन्यत्र श्रापयति । स्वेदयतीत्यर्थः ॥

848. √Śrâ, to cook. The √Śrai to cook will be taught later on. See No. 966. It is that root with its ऐ changed to आ, so that Śrâ may include both the Bhuâdi No. 966, and the Adâdi Śrâ No. 44. The following two Paribhâshâs should be remembered in connectien with forms like these.

Paribhâshâ 1. :—If a root occurring in a rule be such that it belongs to two classes, one in which there is no elision of the characteristic (Vikaraṇa), and the other in which there is an elision of the vikaraṇa (such as the roots of the Adâdi class), then we must interpret the rule to mean the root which is not Adâdi. Thus here श्रा belongs both to Bhuâdi and Adâdi : we must take it to mean Bhuâdi, and not Adâdi; in accordance with this maxim.

Paribhâshâ 2 :—Whenever a term is employed which might denote both something original and also something else resulting from a rule of Grammar—or when a term is employed in a rule which might denote both something by another rule in which the same individual term has been employed, and also something else formed by a general rule—such a term should be taken to denote, in the former case, only that which is original, and in the latter case, only that which is formed by that rule in which the same individual term has been employed. Thus in accordance with this maxim, the *original* root श्रा of the Adâdi class is to be taken, and not the root श्रै of the Bhuâdi class which assumes the form श्रा by the application of a rule of Grammar. The combined result of these two maxims is that we take *both* roots—the श्रै of Bhuâdi and the श्रा of Adâdi. Thus the Caus. श्रपयति means 'causes to boil.' When not meaning to cook, we have श्रापयति 'he causes to perspire'Pre, श्रायति । Per, शिश्राय । I Fut, श्रायिता । Caus, श्रापयति । Aor. अश्रपि or अश्रापि ॥

मारणतोषणनिशामनेषु ज्ञा ८४९ । 'निशामन' चाक्षुषज्ञानम्' इति माधवः । 'ज्ञापनमात्रम्' इत्यन्ये । 'निशानेषु' इति पाठान्तरम् । निशानं तीक्ष्णीकरणम् । एष्वेवार्थेषु जानातिर्मित् । 'ज्ञप मिच्च' इति चुरादौ । ज्ञापनं मारणादिकं च । तस्यार्थः । कथं 'विज्ञापना भर्तृषु सिद्धिमेति' इति 'तज्ज्ञापयत्याचार्यः' इति च । शृणु । माधवमतेऽचाक्षुषज्ञाने मित्त्वाभावात् । ज्ञापनमात्रे मित्वमिति मते तु 'ज्ञा नियोगे' इति चौरादिकस्य । धातूनामनेकार्थत्वात् । निशानेष्विति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिः ॥

849. √Jñâ to kill, to satisfy, to observe or behold. According to Mâdhava, niśâmana means visual perception. Others say it means to inform in general. Another reading is Niśâneshu. The root will then mean 'to sharpen'. The root √ज्ञा is मित् in these senses only. The Churâdi √ज्ञप is also मित् । See Churâdi No. 81. That also means to make known, to kill &c. If the root in these senses be मित्, how do you explain the forms विज्ञापयति and ज्ञापयति instead of विज्ञपयति and ज्ञपयति in the following sentences :—विज्ञापना भर्तृषु सिद्धिमेति "Respectful statement made to superiors brings success,' or ज्ञपयति आचार्यः 'thus announces or proclaims the Achârya'? Listen. According to Mâdhava the √Jñâ is मित् when it means seeing with eyes, and not intellectual conception. The root is therefore not मित् in the above examples, where it means to inform &c. and not visual perception. But in the opinion of those who hold the view that √Jñâ is मित् in the sense of 'to see, to inform' in general, the above forms are explained by saying that they are derived from the √Jñâ niyoge of the Churâdi class No. 193. For roots have many meanings; and so √Jnâ is not confined to niyoga only. Of course, no such difficulties arise in the case of Haradatta

and others who read निशानेषु 'to sharpen,' and not the ambiguous word निशामनेषु in the text.

NOTE:—The different meanings of this root are illustrated by the following examples. Thus पशुं संज्ञपयति 'He causes the sacrificial animal to be killed:' विष्णुं विज्ञपयति 'He propitiates Vishṇu'; संज्ञपयति रूपं 'He shows the form' (according to Mâdhava), 'He explains the form' (according to others). प्रज्ञपयति शरम् 'He sharpens the arrow.'

कम्पने चलिः ८५० । 'चल कम्पने' इति ज्वलादिः । चलयति शाखाम् । कम्पनादन्यत्र तु शीलं चालयति । अन्यथा करोतीत्यर्थः' । 'हरतीत्यर्थः' इति स्वामी । सूत्रं चालयति । क्षिपतीत्यर्थः ॥

850. √Chali to shake. The √Chala to shake is a root belonging to the Jvalâdi sub-division. Thus चलयति शाखां 'He shakes the branch.' But when it does not mean to shake, the Causative is châlayati, as शीलं चालयति 'He deviates from good conduct. That is, he does what is not proper.' According to Svâmi it means 'to take away.' So also सूत्रं चालयति 'he throws the thread.' Here चालयति means क्षिपति according to Sudhâkara. Pre. चलयति । Per चचाल, चेलतुः, चेलुः । I Fut. चलिता ॥

छदिर ८५१ ऊर्जने । 'छद अपवारणे' इति चौरादिकस्य स्वार्थणिजभावे मित्वार्थोऽयमनुवादः । अनेकार्थत्वादूर्जनेऽर्थे वृत्तिः । छदन्तं प्रयुङ्क्ते छदयति । बलवन्तं प्राणवन्तं वा करोतीत्यर्थः । अन्यत्र छादयति । अपवारयन्तं प्रयुङ्क्त इत्यर्थः । स्वार्थे णिचि तु छादयति । बलीभवति । प्राणीभवति अपवारयति वेत्यर्थः ।

851. √Chhadir to strengthen, to animate. This is a repetition of the √Chhada 'to cover over,' of the Churâdi class No. 290, without the णिच्, in order to make it a मित् root. As the roots have many meanings, the sense of ऊर्जन is attached to it here. Thus छदयति means 'he strengthens or animates.' In other senses, the causative is छादयति which means 'he causes to cover.' When the root is Churâdi and takes णिच् without change of sense, we have छादयति meaning 'he becomes strong,' 'he becomes animated' or 'he covers.'

जिह्वोन्मथने लडिः ८५२ । 'लड विलासे' इति पठितस्य मित्त्वार्थोऽनुवादः । उन्मथनं ?पनम् । जिह्वाशब्देन षष्ठीतत्पुरुषः । लडयति जिह्वाम् । तृतीयातत्पुरुषो वा । लडयति जिह्वया । अन्ये तु जिह्वाशब्देन तद्व्यापारो लक्ष्यते । समाहारद्वन्द्वोऽयम् । लडयति शत्रुम् । लडयति दधि । अन्यत्र लाडयति पुत्रम् ।

850. √Lad to loll the tongue. This is a repetition of the √Lad 'to play' (see No 381), in order to make it मित् when it has this particular sense. The word unmathana means 'to strike'. It forms with the word jihvâ a Genitive Tatpurusha compound: meaning 'striking or shaking of the tongue,' Thus लडयति जिह्वाम् 'He lolls the tongue.' Or the word unmathana may form an Instrumental Tatpurusha compound with the word jihvâ. As लडयति जिह्वया 'He strikes by the tongue any other object.' Others hold that by the word jihvâ is indicated the action of the tongue. They say jihvonmathane is a Samâhâra Dvândva compound meaning 'the action of the tongue' and 'to strike.' Thus लडयति शत्रुम् 'He abuses the enemy'; and लडयति दधि 'he licks the curd or churns the curd.'

Note : Thus for the purposes of मित् the root must mean (1) to loll the tongue, (2) to strike with the tongue, (3) to blame or abuse, (4) to lick &c (any action of the tongue) or to churn, orshake, When it has not these meanings, we have लाडयति पुत्रम् 'He fondles his son.'

Note : Another reading is जिह्वोन्मथनयोः । The word मथन is same as मन्थन The इ in the three roots चलि, छदि and लडि is not indicatory of नुम् augment, but merely marks the root,

मदी ८५३ हर्षग्लेपनयोः । ग्लेपनं दैन्यम् । दैवादिकस्य मित्त्वार्थोऽयमनुवादः । मदयति । हर्षयति । ग्लेपयति वेत्यर्थः । अन्यत्र मादयति । चित्तविकारमुत्पादयतीत्यर्थः ।

853. √Madi 'to rejoice', 'to be poor' Glepan means poverty. This is a repetition of the Divâdi root No. 99, for the sake of making it मित् । Thus मदयति means 'He causes to rejoice', or 'he causes to be poor.' When not denoting "to rejoice or to be poor', we have मादयति 'It produces mental confusion.' So also निमादयति 'He pronounces the vowels and consonants clearly.' As we find in the Prâtiśâkhyam उपलब्धिर्विमाद इति । अक्षरव्यञ्जनानामिति शेषः ॥

ध्वन ८५४ शब्दे । भाव्ययं मित्त्वार्थमनूद्यते । ध्वनयति घण्टाम् । अन्यत्र-ध्वानयति । अस्पष्टाक्षरमुच्चारयतीत्यर्थः । अत्र भोजः 'दलि वलि स्खलि रणि ध्वनि त्रपि क्षपयश्च' इति पपाठ ।

854. √Dhvana to sound, This is a repetition, for the sake of मित्, of the root No. 881 to be taught hereafter, see its conjugation there. Thus the Causative is ध्वनयति घण्टाम् 'He sounds the bell.' In any other sense we have ध्वानयति meaning 'He causes to articulate indistinctly.'

Here Bhoja adds the following seven roots also, namely, दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि and क्षपि । Of these ध्वनि and रणि have already been mentioned before in this list see No. 854, and 832. The √Dala to split (No. 581), √vala 'to cover' (No. 520). √skhala 'to stumble (No, 577), and √trap 'to be ashamed' (No. 399), have already been taught before, though not in the मित् sub-division. The causatives of these will be दलयति, वलयति, स्खलयति and त्रपयति ॥

The root क्षपि is the same as the √Kshai to waste, to be mentioned later on (see No. 961) : the ऐ has been changed to आ and पुक् augment has been added. As क्षपयति ॥

तत्र ध्वनि ८५५ रणी उदाहृतौ ।

855. √Raṇa to sound. Caus. रणयति ॥

दल विशरणे ८५६ ।

856. √Dala to split. Caus. दलयति ॥

वल संवरणे ८५७ ।

857. √Vala, to cover. Caus. वलयति ॥

स्खल संचलने ८५८ ।

858. √Skhala to stumble. Caus. स्खलयति ॥

त्रपि ८५९, क्षपयश्च ८६०। त्रपुष् लज्जायाम् इति गताः। तेषां णौ दलयति। वलयति। स्खलयति। त्रपयति। 'क्षै क्षये, इति वक्ष्यमाणस्य कृतात्वस्य पुका निर्देशः। क्षपयति।

859. √Trap to be ashamed. Caus. त्रपयति। Cf. √Trapush 399.

860 √Kshai, to waste. Caus. क्षपयति with the पुक् augment.

स्वन ८६१ अवतंसने। शब्दे इति पठिष्यमाणस्यानुवादः। स्वनयति। अन्यत्र स्वानयति।

861. √Svana, 'to adorn.' This is a repetition of the √Svana 'to sound,' No 879 to be taught later on. Thus the causative is स्वनयति 'He causes to adorn.' But in any other sense we have स्वानयति 'He causes to resound.'

घटादयो मितः। मित्सञ्ज्ञा इत्यर्थः.

"Gaṇa-sûtra" A. The roots beginning with घट No. 800 and ending with स्वन (No. 861) are as if they had an indicatory म् ॥

The result of which is that sûtras VI. 4. 92. &c. apply to them. They get the disignation मित् ॥

जन ८६२, जॄष ८६३, क्नसु ८६४, रञ्जो ८६५, ऽमन्ताश्च ८६६। 'मितः' इत्यनुवर्तते। 'जॄष' इति षित्वनिर्देशाज्जीर्यतेर्ग्रहणम्। जॄणातेस्तु जारयति। केचित्तु 'जनी जॄ ष्णसु–, इति पठित्वा 'ष्णसु निरसने' इति दैवादिकमुदाहरन्ति।

"Gaṇa sûtra" B. The roots √Janî, √Jṛîsha, √Knasu, √Rañja and those whose final is अम् are also मित् ॥

The word मित् is understood in this sûtra. The root जॄ is exhibited in the sûtra with an indicatory ष, as जॄष् ; and therefore it means the root जॄ that is conjugated as जीर्यते i. e. the Divâdi जॄ। The Kṛyâdi जॄ (जॄणाति) is not मित् and its causative is जारयति। Some read this sûtra as, "The roots √Janî, √Jṛi, and √Shṇasu &c"; and they take the Divadi root √Shṇasu No, 5 and give example of it as स्नसयति ॥

862. √Janî 'to be produced.' It is a root of the Divâdi class and is conjugated there. See No. 41. It being a मित् the Causative is जनयति ॥

863. √Jṛîsh, 'to grow old.' This is also a Divâdi root (see No. 22) Its causative is जरयति। Some read झॄ instead of जॄ ॥

864. √Knasu, This is also a Divâdi root (see No. 6). The causative is क्नसयति ॥

865. √Rañja 'to color.' This is a root belonging to both Divâdi and Bhvâdi classes. Its causative is रञ्जयति or रजयति। As रजयति मृगान् = रमयति। The न् is elided by the vârtika under VI. 4. 91. रञ्जयति पक्षिणः। No elision, as the object is 'birds' and not beasts.

866. The roots ending in अम् are मित् ॥

As the roots क्रम, गम्, रम्, &c. Thus their causatives are क्रमयति, गमयति, रमयति ॥

ज्वलह्वलह्मलनमामनुपसर्गाद्वा। ८६७। एषां मित्त्वं वा। प्राप्तविभाषेयम्। ज्वलयति। ज्वालयति। उपसृष्टे तु नित्यं मित्त्वम्। प्रज्वलयति। कथं तर्हि प्रज्वालयति। उद्वामयतीति। घञन्तात् 'तत्करोति–' इति णौ। कथं संक्रामयतीति। 'मितां

ह्रस्वः' (२५६८) इति सूत्रे 'वा चित्तविरागे' (२६०४) इत्यतो 'वा' इत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति वृत्तिकृत्। एतेन 'रजो विश्रामयन्राज्ञां' 'धुर्यान्विश्रामयेति सः' इत्यादि व्याख्यातम्।

867. "Gaṇa sûtra C. The roots √Jvala, √Hvala, √Hmala, and √Nama, are optionally मित् when not preceded by any preposition.

When they are connected with a preposition they are optionally मित्। This is an example of prâptavibhâshâ. For these roots have already been declared as मित् by the previous rules. नम ends in अम् and is मित् by the last sûtra. The present sûtra declares an option under certain circumstances. As ज्वलयति or ज्वालयति॥

But when they are preceded by an upasarga they are *necessarily* मित् and no option is allowed. As प्रज्वलयति॥

How do you explain the non-mit causatives like प्रज्वालयति and उन्नामयति। These are not from the roots ज्वल् and नम्, but from the nouns ज्वाल and नाम formed by घञ् added to the above roots. To the nouns ज्वाल and नाम is added the Denominative affix णिच् with the force of तत्करोति। (See Churâdi Gaṇa sûtra तत् करोति तदाचष्टे after the root कत्र) How do you explain the form संक्रामयति? According to the author of Kâśikâ Vṛitti, it is explained as an example of option. For he reads in the sûtra मितां ह्रस्व (VI. 4. 92. S. 2568), the anuvṛitti of वा 'optionally' from वा चित्तविरागे (VI. 4. 91. S. 2604); and makes that rule a vyavasthita-bibhâṣhâ. On that theory is explained also the forms रजो विश्रामयन् राज्ञाम् and धुर्यान् विश्रामयेति सः &c.

ग्लास्नावनुवमां च। ८६८। अनुपसर्गाद्वेषां मित्त्वं वा स्यात्। आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषा।

868. "Gana sûtra" D. The roots Glâ, Snâ, Vanu and Vama are optionally मित्॥

These roots are optionally मित् when not preceded by any preposition. In the case of the first two roots, it is an aprâpta-vibhâshâ, for no rule has as yet declared √Glâ and √Snâ to be मित्। In the case of the last two roots, it is prâpta-vibhâshâ, for they were already मित् by the previous sûtra. Caus. ग्लपयति, ग्लापयति, स्नपयति, स्नापयति, वनयति, वानयति, वमयति, वामयति॥

न कम्यमिचमाम्। ८६९। अमन्तत्वात् प्राप्तं मित्त्वमेषां न स्यात्। कामयते। आमयति। चामयति।

869. "Gana sûtra" E. The roots √Kam 'to love' √Am 'to go' and √Cham 'to eat' are not मित्॥

These roots all end in अम् and, therefore, by the Gaṇa-sûtra जनी &c they would have been मित्। Thus Caus. कामयते। आमयति। आचामयति॥

शमो दर्शने। ८७०। शाम्यति दर्शने मिन्न स्यात्। निशामयति रूपम्। अन्यत्र तु "प्रणयिनो निशमय्य वधूकथाः"। कथं तर्हि "निशामय तदुत्पत्तिं विस्तराद्गदतो मम" इति। शम आलोचने इति चौरादिकस्य धातूनामनेकार्थत्वाद्वा दर्शने वृत्तिः शाम्यतिवत्।

870. "Gaṇa sûtra" F. The root √S'ama meaning 'to see,' is not मित् ॥

This root belongs to the Divâdi class. As निशामयति रूपम् । 'He shows the form.' अत्युत्कृष्टमिदं तीर्थं भारद्वाज निशामय । "This is a very excellent holy place. see it O! Bhâradvâja.' When not meaning to see it is मित् as it ends with अम् । Thus प्रणयिनो निशमय्य वधूः कथाः । How do you explain the form निशामय in the following verse : निशामय तदुत्पत्तिं विस्तराद् गदतो मम । "Hear from me in detail the account of his birth." This is a from of the Churâdi root शम No. 156. As roots have multiple meanings. it means here 'to listen'; like शाम्यति ॥

यमोऽपरिवेषणे । ८७१ । यच्छतिर्भोजनतोऽन्यत्र मिन् न स्यात् । आयामयति । द्राघयति । व्यापारयति वेत्यर्थः । परिवेषणे तु—यमयति ब्राह्मणान् । 'भोजयति' इत्यर्थः । 'पर्यवसितं नियमयन्' इत्यादि तु नियमवच्छब्दात् तत्करोतीति णौ बोध्यम् ।

871. "Gaṇa-sûtra." G. The root √yama, when not meaning to eat, is not मित् ॥

When not meaning to eat, the root यम उपरमे (यच्छति &c). is not मित् । Thus आयामयति which is equivalent to द्राघयति or व्यापारयति । But when it means 'to eat,' we have यमयति ब्राह्मणान् । 'He feeds the Brâhmaṇas.' The form नियमयन् is not the causative Present Participle of √यम, but to the noun नियमवत् is added the Denominative affix णि under तत् करोति sûtra, When this affix is added, the वत् is elided. From the Denominative root thus formed, we get the Present Participle नियमयन् ॥

स्खदिर ८७२ अवपरिभ्यां च । मित्वेत्येव । अवस्खादयति । परिस्खादयति । 'अपावपरिभ्यः' इति न्यासकारः । स्वामी तु 'न कमि—' इति नञमुत्तरत्रिसूत्र्यामननुवर्त्य शमः 'अदर्शने' इति विच्छेद । यमस्तु 'अपरिवेषणे' मित्त्वमाह । तन्मते 'पर्यवसितं नियमयन्' इत्यादि सम्यगेव । 'उपसृष्टस्य स्खदेश्चेदवादिपूर्वस्य' इति नियमात्प्रस्खादयतीत्याह । तस्मात्सूत्रद्वये उदाहरणवत्युदाहरणयोर्व्यत्यासः फलितः । इदं च मतं वृत्तिन्यासादिविरोधादुपेक्ष्यम् ।

872. "Gaṇa sûtra." H. The root Skhada when preceded by the Prepositions '*ava*' or '*pari*' is not मित् ॥

The words 'it is not मित्' are understood here also. Thus अवस्खादयति and परिस्खादयति ॥

According to Bodhi Nyâsa, the three prepositions अप, अव and परि are taken for the purposes of this rule.

In the opinion of Svâmi the anuvritti of 'not' from the sûtra न कमि &c Gaṇa sûtra E is not to be read in the subsequent sûtras F, G, and H, as we have done. According to him the sûtra F is not शमो दर्शने but शमोऽदर्शने meaning "the root √शम when denoting 'not-seeing' is मित्" । He explains sûtra G as "the root √यम when not meaning *to eat* is मित्" । In his opinion the examples पर्यवसित. नियमयन् &c are perfectly valid examples under the rule, with nothing exceptional about them. With regard to the present sûtra H. he explains it by saying 'the

√Skhada which is always मित् without a preposition, is conditionally मित् when preceded by the Prepositions अव, and परि but it is not मित् when preceded by any other Preposition than these two.' In other words he makes the present sûtra a Niyama rule, restricting the मित् = hood of the compound verb √Skhada to the Prepositions अव and परि । Therefore प्रस्खादयति is not मित् because the upasarga is प्र । Thus of the three sûtras F, G and H, asregards F. there is no ultimate difference between the Swami and us, With regards to G and H his view is diametrically opposed to us : so that the examples we have given under these sûtras are his counter-examples, and our counter-examples are his examples. This opinion should be rejected as oppossed to the author of the Kâśikâ Vṛitti, and Nyâsa Kâra &c.

फण ८७३ गतौ । 'न' इति निवृत्तमसंभवात् । निषेधात्पूर्वमसौ न पठितः । फणादिकार्यानुरोधात् ।

873. √Phaṇa, to go. The **anuvritti of न** of the Gaṇa-sûtra E which was current in the previous sûtras, is not to be read in this, and its anuvṛitti ceases; for it is not possible to read it into this sûtra. This sûtra could well have been inserted prior to the commencement of the prohibitory sûtras E, F, G, H. But it has not been so read, because of the necessity of those rules which ordain specific operations with regards to फणादि roots : such as the next sûtra.

२३५४ । फणां च सप्तानाम् । ६ । ४ । १२५ ॥

एषां वा एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च । फेणतुः । फेणुः । फेणिथ । पफणतुः । पफणुः । फणयति ॥

2354. ए is optionally substituted for the अ and आ of the seven roots फण्, राज् भ्राज् भ्राश्, भ्लाश् स्यम् and स्वन्; and the reduplicate is elided thereby, before the affixes of the Perfect having an indicatory क् (or ङ्) as well as before the थ with the इट् augment.

Thus फेणतुः, फेणुः, फेणिथ or पफणतुः, पफणुः, पफणिथ ॥ So also the causative फणयति. ॥

'वृत् । घटादिः समाप्तः । फणेः प्रागेव वृदित्येके । तन्मते फाणयतीत्येव ।

End. The word vṛit means that the Ghaṭâdi roots end here or they remain only upto this place. It marks the end of this subdivision. Some read this word वृत् just before फण; and so in their opinion it is not a मित् root. Their causative is फाणयति ।

Pre. फणति । Per. पफाण । फेणतुः । फेणुः । पफणिथ । पफण । पफणिव or फेणिव । पफणिम or फेणिम । I Fut. फणिता । Aorist अफाणीत् । अफणीत् । Caus. फणयति । Caus. Aor. अपीफणत्, । When not meaning, to go, we have फाणयति सक्तून 'He skims the gruel', Desi. पिफणिषति । Inten. पंफण्यते । Yan luk. पम्फणीति or पम्फाण्टि । D. पम्फाण्टः । Imperative पम्फाण्हि । Noun फाण्टः 'a decoction.'

राज ८७४ दीप्तौ । स्वरितेत् । राजति-राजते । रेजतु.- रराजतुः । रेजे रराजे । 'अतः' इत्यनुवृत्तावपि विधानसामर्थ्यादात एत्वम् ।

874. √ Rajṛi to shine. It is svaritet and consequently is conjugated in both Padas. Pre. राजति । A. राजते । Per. रराज । रेजतुः or रराजतुः । A. रराजे or रेजे। Though by VI. 4. 120, the ए substitution can take place only where there is short अ and not where there is long आ as in राज, yet it is so here, because of the specific rule VI. 4 125 S. 2354, which causes the आ to be changed to ए । I Fut. राजिता। A. राजिता । Caus. राजयति ; A. राजयते । Aor. अरराजत् । Desi. रिराजिषति । A. रिराजिषते । Inten. राराज्यते । Yaṇ luk राराष्टि। Nouns : सम्राट् 'an emperor.' राष्ट्रम् । राजन् । राजन्यः ॥

'टुभ्राज ८७५, टुभ्राशृ ८७६, टुभ्लाशृ ८७७ दीप्तौ'। अनुदात्तेतः । भ्राजतेरिह पाठः फणादिकार्यार्थः । पूर्वं पाठस्तु व्रश्चादिषत्वाभावार्थः । तत्र हि राजिसाहचर्यात्फणादेरेव ग्रहणम् । भ्रेजे—बभ्राजे । 'वा भ्राश—' (२३२१) इति श्यन्वा । भ्राश्यते—भ्राशते । भ्रेशे—बभ्राशे । भ्लाशते—भ्लाश्यते । भ्लेशे—बभ्लाशे। द्वावपीमौ तालव्यान्तौ ॥

875. √ Ṭu bhrâjṛi, 876 √ Tu Bhrâśṛi, 877 √ Ṭu Bhlâś ṛi 'to shine, These are anudâttet. The root √ Bhrâj is repeated here to make it applicable the Phaṇ`di rule S. 2354. Its enumeration in the preceding root No. 194 is to prevent the application to it of the षत्व rule VIII, 2, 36. The ज of that भ्राज् is not changed to ष्; but the ज् of this bhrâj is so changed. For in the sûtra VIII. 2. 36 the root bhrâj is read in the company of राज and so indicates that it is the Phaṇâdi √ Bhrâj which is the subject of that rule. Pre. भ्राजते । Per. भ्रेजे or बभ्राजे । I Fut. भ्राजिता । Inten. बाभ्राज्यते । Yaṇ luk बाभ्राष्टि । Imperfect. अबाभ्राद् । Noun. भ्राजथुः । भ्राष्ट्रम् ॥

876. √ Bhrâś to shine. Pre. भ्राश्यते or भ्राशते । The श्यन् is added optionally by III. 1 70. S. 2321. Per. भ्रेशे, बभ्राशे । I Fut. भ्राशिता । II Fut. भ्राशिष्यते । Imperative. भ्राश्यताम् । भ्राशताम् । Imper. अभ्राश्यत । अभ्राशत । Pote भ्राश्येत । भ्राशेत । Bene. भ्राशिषीष्ट । Aorist. अभ्राशिष्ट । Caus. भ्राशयति । Aor. अबभ्राशत् । Desi. बिभ्राशिषते । Inten. बाभ्राश्यते । Yaṇ luk. बाभ्राष्टि । Nouns. भ्राशथुः ॥

877. √ Bhlâś to shine. Pre. भ्लाश्यते । भ्लाशते । Per. भ्लेशे । बभ्लाशे । I Fut, भ्लाशिता । II Fut. भ्लाशिष्यते । Imperative. भ्लाश्यताम् । भ्लाशताम् । Imper. अभ्लाश्यत । अभ्लाशत । Pote. भ्लाश्येत । भ्लाशेत । Bene, भ्लाशिषीष्ट । Aorist. अभ्लाशिष्ट । Desi, बिभ्लाशिषते । Nouns, भ्लाशथुः ॥

'स्यमु ८७८, स्वन ८७९, ष्टन or स्तन ८८०, ध्वन ८८१ शब्दे । स्यमादयः क्षरत्यन्ताः परस्मैपदिनः । स्येमतुः—सस्यमतुः । अस्यमीत् । स्वेनतुः—सस्वनतुः । सस्वनुः । अस्वानीत्—अस्वनीत्। विष्वणति । अवष्वणति । सशब्दं भुङ्क्त इत्यर्थः । 'वेश्च स्वनः—' (२२७४) इति षत्वम् । फणादयो गताः । दध्वनतुः ॥

The roots commencing with √ Syam and ending with √ Ksharate are Parasmaipadi. 878. √ Syamu, 879 √ Svana 880. √ Shṭana 881. √ Dhvana to sound. Pre. स्यमति । Per. सस्याम । स्येमतुः or सस्यमतुः । स्येमिथ or सस्यमिथ । स्येमुः । I Fut. स्यमिता । Aorist. अस्यमीत् । Caus. स्यमयति । Aorist. असिस्यमत् । It is a मित् root as it ends with अम् । Desi. सिस्यमिषति । Inten. सेस्यम्यते । Yaṅ luk. संस्यमीति or संस्यन्ति। Ger. स्यमित्वा or स्यान्त्वा ॥

879. √Svana to sound. Pre. स्वनति । With वि or अव, we have विष्वणति अवष्वणति । The स is changed to ष by S. 2274. Per. सस्वान । सस्वनतुः or स्वेनतुः । I Fut. स्वनिता । Aorist. अस्वानीत् or अस्वनीत् । Caus. स्वानयति । Aor. असिस्वनत् । It is a मित् root as read in the Ghatâdi list. Desi. सिस्वनिषति । Inten. संस्वन्यते ! Yan luk. संस्वन्ति ॥

880. √Shṭana to sound. Pre. स्तनति । Per. तस्तान । I Fut. स्तनिता ॥

881. √Dhvana to sound, Pre. ध्वनति । Per. दध्वान । I Fut. ध्वनिता । Noun, ध्वनिः ॥

Here ends Phanâdi subdivision.

षम ८८२, ष्टम ८८३ अवैकल्पे । ससाम । तस्ताम ॥

882. √Ṣhama, 883 √Ṣhṭama 'to be confused,' or 'not to be confused' Pre. समति । Per. ससाम । सेमतुः । सेमिथ । I Fut. समिता । Caus. समयति । Aor. असीषमत् । Desi. सिसमिषति । Inten. संसम्यते । Yan luk संसमीति or संसन्ति । d. ससान्तः ॥

883. √Ṣhtama 'not to be confused.' Pre. स्तमति । Per. तस्ताम । तस्तमतुः । I Fut. स्तमिता । Caus. स्तमयति । Aor. अतिष्टमत् । Inten. तंस्तम्यते । Yan luk. तंस्तन्ति ॥

ज्वल ८८४ दीप्तौ । अतो ल्रान्तस्य (२३३०) । अज्वालीत् ॥

884. √Jvala, to shine, to burn. Pre. ज्वलति । Per. जज्वाल । जज्वलतुः । I Fut. ज्वलिता । II Fut. ज्वलिष्यति । Imperative ज्वलतु । Imper. अज्वलत् । Pote. ज्वलेत् । Bene. ज्वल्यात् । Aorist. अज्वालीत् । 1 See S. 2330 for Vṛiddhi. Condi. अज्वलिष्यत् । Caus. ज्वलयति, or ज्वालयति । प्रज्वलयति । No option, it is necessarily मित् here. Desi. जिज्वलिषति । Inten. जाज्वल्यते । Yan luk जाज्वलीति । Nouns. ज्वालः । ज्वलः । ज्वलनः ॥

चल ८८५ कम्पने ।

885. √Chala. to shake, tremble, move, Pre. चलति । Per. चचाल । चेलतुः । चेलुः । I Fut. चेलिता । Aorist. अचालीत् । Caus. चलयति, चालयति । Nouns. चलः । चालः । चलनः ॥

जल ८८६ घातने । घातनं तैक्ष्ण्यम् ॥

886. √Jala, to be sharp. Ghâtana means sharpness. Pre. जलति । Per. जजाल । I Fut. जलिता । Aorist. अजालीत् । Nouns. जलः । जालः । जडः ॥

टल ८८७, ट्वल ८८८ वैक्लव्ये ।

887. √Tal, 888 √Tval, to become confused or disturbed. Pre. टलति । Per. टटाल । I Fut. टलिता ॥

888 √Tval to become disturbed or confused. Pre. ट्वलति । Per. टट्वाल । टट्वलतुः । I Fut. ट्वलिता । Aorist. अट्वालीत् । Nouns. ट्वालः । ट्वलः ॥

स्थल ८८९ स्थाने । Or ष्ठल स्थाने ।

889. √Sthala to stand firm, be firm. Pre. स्थलति । Per. तस्थाल । I Fut. स्थलिता । Aorist. अस्थालीत् । Caus. स्थालयति । Aor. अतिष्ठलत् । Inten. तास्थल्यते । Yan luk तास्थलीति । Nouns. स्थलः । स्थालः । स्थलं । स्थली । स्थला । स्थाली । विष्ठलम् । कपिष्ठलम् ॥

हल ८९० विलेखने ।

890. √Hal, to plough. Pre. हलति । Per. जहाल । I Fut. हलिता । Aorist. अहालीत् । Nouns. हलः । हालः । हलिः ॥

णल ८९१ गन्धे । बन्धने इत्येके ॥

891. √ṇal to smell. Kâśyapa says it means 'to bind.' Pre. नलति । प्रणलति । Per. ननाल । I Fut. नलिता । Aorist. अनालीत्, or अनलीत् । Nouns. नलः । नालः नाली । प्रणाली । नडः । नड्वलः । नड्वान् ॥

पल ८९२ गतौ । पलति ॥

892. √Pala, to go, move Pre. पलति । Per. पपाल । I Fut. पलिता । Aorist. अपालीत् or अपलीत् । Nouns. पलम् । पललं 'meat.' पलालम । पलाली ॥

बल ८९३ प्राणने धान्यावरोधने च । बलति । बेलतुः । बेलुः ॥

893. √Bala 1. to breathe or live. 2. To hoard grain. Pre. बलति । Per. बबाल । बेलतुः । बेलुः । I Fut. बलिता । Aorist. अबालीत्, or अबलीत् । Nouns. बालम् । बलम् । बाला । बलूलः । बलिः ॥

पुल ८९४ महत्त्वे । पोलति ॥

894. √Pula, to be great, to be lofty. Pre. पोलति । Per. पुपोल । I Fut. पोलिता । Caus. पोलयति । Aor. अपूपुलत् । Desi. पुपुलिषति, पुपोलिषति । Inten. पोपुल्यते । Yañ luk पोपुलीति or पोपोल्ति । Past. Part. Pass. पुलितम् or पोलितम् । Ger. पुलित्वा or पोलित्वा । Nouns. पुलः । पुलकः । पुलिनः । पुलाकः ॥

कुल ८९५ संस्त्याने बन्धुषु च । संस्त्यानं संघातः । बन्धुशब्देन तद्व्यापारो गृह्यते । कोलति । चुकोल ॥

895. √Kula, to accumulate collect, (2) to behave as a kinsman, to be related. Saństyâna means collection. By the word bandhu or kinsman is taken here the act or behaviour of a Kinsman. Some read santâna instead of saństyâna. Santâna means an uninterrupted flow, as of father, son and grandson &c. Per. कोलति । Per चुकोल । I Fut. कोलिता । Desi. चुकोलिषति, चुकुलिषति । Inten. चोकुल्यते । Nouns. कुलीनः । कुल्यः । कौलेयः ॥

शल ८९६, हुल ८९७, पत्लृ ८९८ गतौ । शशाल । जुहोल । पपात । पेततुः । पतिता ॥

896. √Śal, 897 √Hula, 898 √Patḷṛi to go. The root √Hula means to kill and to cover also (हिंसा संवरणयोश्च) । Some texts read this sûtia as √Śala, √hvala, √hmala, √patḷṛi gatau, √hula hinsâ samvaranaycś cha. Pre. शलति । Per, शशाल । I Fut. शलिता । Nouns. शालः । शाला ॥

897. √Hula to go. Pre. होलति । Per. जुहोल । I Fut. होलिता । Caus. होलयति । Desi. जुहोलिषति, जुहुलिषति, Inten. जोहुल्यते । Ger. हुलित्वा or होलित्वा ॥

898. √Patḷṛi to fall, Pre. पतति । Per. पपात । पेततुः । पेतुः । I Fut. पतिता । II Fut. पतिष्यति । Imperative. पततु । Imper. अपतत् । Pote. पतेत् । Bene. पत्यात् । Aorist. अपप्तत् । In forming the Aorist, the next sûtra applies which inserts a प । Condi. अपतिष्यत् । Caus. पातयति । Desi. पिपतिषति or पित्सति । This root is optionally सेट् । See *ante*. Inten. पापत्यते । Yañ luk पनीपत्यते or पनीपत्ति । Past. Part. Pass. पतितः । Ger. पतित्वा । Infini. पतितुम् । Nouns, पतनः । पातुकः । पत्रम् । पत्रम् । पतङ्गः । पतत्रम् । पातालः । पताका । पन्था । पथिकः ॥

२३५५ । पतः पुम् । ७ । ४ । १९ ॥

अङि परे । अपप्तत् । 'नेर्गद—' (२२८५) इति णत्वम् । प्रण्यपप्तत् ॥

2355. The augment पु is added after the vowel of the root पत, in the अङ् Aorist.

As अपप्तत्, अपप्तताम्, अपप्तन् । The पत् takes the अङ् Aorist as it has an indicatory ऌ in the Dhâtupâṭha (III. 1. 55).

The न of the upasarga नि is changed to ण after an alterant preposition by S. 2285. As प्रण्यपप्तत् ॥

क्वथे ८९९ निष्पाके । क्वथति । चक्वाथ । अक्वथीत् ॥

899. √Kvathe to boil, decoct, digest, Pre. क्वथति । Per. चक्वाथ । I Fut. क्वथिता । Aorist अक्वथीत् । Caus. क्वथयति । It belongs to the Ghaṭâdi class and is hence मित् । Noun. क्वाथः ॥

पथे ९०० गतौ । अपथीत् ॥

900. √Pathe to go. Pre. पथति । Per. पपाथ । पेथतुः । I Fut. पथिता । Aorist अपथीत् । Noun. पथः । पाथः ॥

मथे ९०१ विलोडने । मेथतुः । अमथीत् ॥

901. √Mathe to churn. Pre. मथति । Per. ममाथ । मेथतुः । I Fut. मथिता । Aorist अमथीत् । Nouns. माथः । मंथः ॥

टुवम् ९०२ उद्गिरणे । इहैव निपातनात् ऋतः इत्त्वमिति सुधाकरः । ववाम । ववमतुः । वादित्वादेत्वाभ्यासलोपौ न । भागवृत्तौ तु वेमतुरित्याद्यप्युदाहृतं तद्भाष्यादौ न दृष्टम् ॥

902. √Tuvama, to vomit. The word उद् गिरण is from the root √गृ । The *short* ऋ could not be changed to इ by any rule of Grammar. The *Grammatical* form would have been उद्गरणं with the Guṇa of ऋ । But Pâṇini uses the word उद्गिरण in this sûtra. So Sudhâkara says " the Nipâtana of this sûtra is the authority for changing the short ऋ of गृ into इ । " Pre. वमति । Per. ववाम । ववमतुः । There is no एत्व or the elision of abhyâsa, because the root begins with व । In Bhagavṛitti the forms वेमतुः &c. are given. They are not found in the Bhâshya &c. I Fut. वमिता । Aorist अवमीत् । No Vṛiddhi. Caus. वामयति, वमयति । See Gaṇa sûtra D. of the Ghaṭâdi. Desi. विवमिषति । Inten. वंवम्यते । Yaṅ luk. वंवन्ति । d. वंवान्त : Imperative वंवान्हि । Imperfect अवंवन् । Past. Part. Pass. वान्तः । Act. वान्तवान् । Nouns. वामः । वमथुः ॥

भ्रमु ९०३ चलने । 'वा भ्राश—' (२३२१) इति श्यन्वा । भ्रम्यति—भ्रमति । 'भ्राम्यति' इति तु दिवादेर्वक्ष्यते ॥

903. √Bhramu to move, to walk.

This root is optionally conjugated as a Divâdi root with श्यन् Vakaraṇa. (See 2321). Thus भ्रम्यति or भ्रमति । The form भ्राम्यति will be taught later on in the Divâdi. The Perfect is बभ्राम ।

an forming its dual the following sûtra applies.

२३५६ । वा जॄभ्रमुत्रसाम् । ६ । ४ । १२४ ॥

एषामेत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च । भ्रेमतुः–बभ्रमतुः । अभ्रमीत् ॥

2356. ए is optionally substituted for the अ of the stems जर् (जॄ) भ्रम्, and त्रस्, and the reduplicate is thereby elided, before the affixes of the Perfect having an indicatory क् (or ङ्), as well as before the थल् with the augment इट् ॥

Thus (जेरतुः, जेरुः, जेरिथः, जजरतुः, जजरुः, जजरिथ) भ्रेमतुः, भ्रेमुः, भ्रेमिथ, or बभ्रमतुः, बभ्रमुः, बभ्रमिथ । त्रेसतुः, त्रेसुः, त्रेसिथ, or तत्रसतुः, तत्रसुः, तत्रसिथ ॥

903. √ Bhramu to move, to walk. Pre. भ्रमति or भ्राम्यति । Per. बभ्राम । बभ्रमतुः or भ्रेमतुः । I Fut. भ्रमिता । II Fut. भ्रमिष्यति । Imper. भ्रमतु or भ्राम्यतु । Imper. अभ्रमत् or अभ्राम्यत् । Poten. भ्रमेत् or भ्राम्येत् । Bene. भ्रम्यात् । Aorist. अभ्रमीत् । Condi. अभ्रमिष्यत् । Caus. भ्रमयति । As it ends in अम् so it is मित् । Desi. बिभ्रमिषति । Inten. बम्भ्रम्यते । Yan luk बम्भ्रन्ति । d. बम्भ्रान्तः । Imperative बम्भ्रांहि । Imperfect अबम्भ्रन् । Past. Part. Pass. भ्रान्तः । Act. भ्रान्तवान् । Ger भ्रमित्वा or भ्रान्त्वा । Nouns. भ्रमः । भ्रमरः । भ्रूः ॥

क्षर ९०४ संचलने । अक्षारीत् ॥

904. √ Kshara, to ooze, to flow. Some read this sûtra as क्षल संचलने √ क्षल is conjugated like √ क्षर । Pre. क्षरति । Per. चक्षार । I Fut. क्षरिता । Aoirst. अक्षारीत् । Desi, चिक्षरिषति । Inten. चाक्षर्यते । Yan luk. चाक्षर्ति । Imperative चाक्षर्हि । Imperfect अचाक्षर् । Nouns. । क्षारः । क्षरः । क्षरेजः ॥

Here end the roots beginning with Sama, which were Udâtta and Udâttet.

SUB-SECTION.

अथ द्वावनुदात्तेतौ ॥

Now the next two roots are Anudatteta.

षह ९०५ मर्षणे । परिनिविभ्यः (२२७५) इति षत्वम् । परिषहते । सेहे । सहिता । 'तीषसहे–' (२३४०) इति वा इट् । इडभावे ढत्वधत्वष्टुत्वढलोपाः ॥

905. √ Shaha to endure, forbear.

The स is changed to ष by VIII. 3. 70. S. 2275 when preceded by pari, vi, or ni. As परिषहते । The Perfect is सेहे । The first future सहिता । The इट्' augment is optional by VII. 2. 48. S. 2340. When इट् is not added, then we have the equation. सह् + ता = सढ् + ता (VIII. 2. 31 S. 324) = सढ + धा (VIII. 2. 40. S. 2280) = सढ् + ढा (VIII. 4. 40 S. 111) = स + ढा (VIII. 3. 13 S. 2335),

Now applies VI. 3. 112 S. 2 357 by which the अ of स is changed to ओ ॥

२३५७ । सहिवहोरोदवर्णस्य । ६ । ३ । ११२ ॥

अनयोरवर्णस्य ओत्स्याड्ढलोपे सति ॥

2357. When ढ् or र् are elided, there is the substitution of ओ for the अ or आ of the verbs सह् and वह् ॥

Thus स + ढा = सोढा ॥

This स of Sodhâ however is not changed to ष after परि &c., because of the following sûtra:—

२३५८ । सोढः । ८ । ३ । ११५ ॥

सोढ्रूपस्य सहेः सस्य षत्वं न स्यात् । परिसोढा ॥

2358. The स् of सोढ form of the root सह is not changed to ष् ॥

As परिसोढा । This is an exception to VIII. 3. 70.

NOTE: — Why do we say 'when सह assumes the form of सोढ' । Observe परिषहते, विषहते ॥

The change of स to ष of √सह is optional by the following sûtra when the augment अट् intervenes between the verb and the preposition परि &c,

२३५९ । सिवादीनां वाड्व्यवायेऽपि । ८ । ३ । ७१ ॥

परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेऽपि । पर्यषहत–पर्यसहत ॥

2359. The ष्-change may take place optionally in the सिव् and the rest (of sûtra VIII. 3. 70 S. 2275). even when the augment अ intervenes between the prepositions परि, नि or वि and the verb.

The सिवादि are the four roots सिव सह, स्तु and स्वञ्ज, as well as the augment सुट् । This is an example of ubhayatra-vibhâshâ. In the case of स्तु and स्वञ्ज् it is prâpta-vibhâshâ, in the case of others it is aprâpta. Thus परि + असहत (Imperfect) = पर्यषहत or पर्यसहत ॥

905. √Shaha, to endure, to forbear. Pre. सहते । Per. सेहे । I Fut. सहिता; सोढा । II Fut. सहिष्यते or सोढ्यते । Imperative सहताम् । Aorist असहिष्ट । Causative साहयति । Aor. असीषहत् । Desi. सिसहिषते । Inten. सासह्यते । Yaṅ luk सासोढि । Dual सासोढः 2. S. सासक्षि । Adjective सह्यम् । Nouns : साहः । सहः । सहिष्णुः । सहनः । सासहिः ॥

रमु ९०६ क्रीडायाम् । रेमे । रेमिषे । रन्ता । रंस्यते । रंसीष्ट । अरंस्त ॥

906. √Ramu, to play, sport, dally. Pre. रमते । Per. रेमे । I Fut. रन्ता । II Fut. रंस्यते । Imperative रमताम् । Imper. अरमत । Poten. रमेत । Bene. रंसीष्ट । Aorist अरंस्त । Condi. अरंस्यत । Caus. रमयति । Aor. अरीरमत् । Desi. रिरंसते । Inten. रंरम्यते । Yaṅ luk. रंरन्ति । D. रंरतः (the nasal is elided by VI. 4. 37) 2. S. रंरंसि । S, रंरंमि । 1. Pl. रंरंमः । Nouns : रमः । रामः । रमणः । रन्तिः । रत्नम् । रथः ॥

SUB-SECTION.

अथ कसन्ताः परस्मैपदिनः ।

The roots upto √कस are Parasmaipadî.

षद्लृ ९०७ विशरणगत्यवसादनेषु ।

907. √Shadḷri, 1. To split or burst, 2. to go. 3. to be dejected. In conjugating this root, सद is replaced by सीद by the following sûtra :—

२३६० । पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः । ७ । ३ । ७८ ॥

पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे । सीदति । ससाद । सेदतुः । सेदिथ–ससत्थ । सत्ता । सत्स्यति । लृदित्वादङ् । असदत् । 'सदिरप्रतेः' (२२७१) । निषीदति । न्यषीदत् ॥

Thus we have स्तात्। स्तम्। स्त। असानि। असाव। असाम। In the Imperfect we have ईट् by VII. 3. 96. S. 2225. as आसीत्। In the dual, there is आट् augment before स्ताम् (VI. 4. 72. S. 2254), because the elision of अ by S. 2469 is asiddha, it being an âbhîya rule, and hence स्ताम् is considered as beginning with vowel. Thus we have आस्ताम्। Pl. आसन्। Pot. स्यात्। Ben. भूयात्। Aor. अभूत्। This is thus derived. अभू + सिच् + त् = अभू + 0 + त् (the सिच् is elided by II.

4. 77. S. 2223). Now the aprikta त् required ईट् by VII. 3. 96. S. 2225. But it is not added, as we have already explained under that sûtra, that ईट् comes only then when सिच् and अस् exist as सिच् and अस् । See page 31. of this volume. Therefore we have अभूत् ।

The स of अस् is changed to ष् when preceded by an alterant preposition, by the following :—

२४७२ । उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । ८ । ३ । ८७ ।

उपसर्गेभ्यः प्रादुसश्च परस्यास्तेः सस्य षः स्याद्यकारेऽचि च परे । निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति । 'यच्परः' किम् । अभिस्तः । 'मृजू ५७ शुद्धौ' ।

2472. The स् of the verb अस् is changed to ष्, when it is followed by a vowel or य् and is preceded by प्रादुः, or an upasarga having इ or उ in it.

The word यच् परः means 'followed by य् or अच्' ॥ The word प्रादुः is an Indeclinable, meaning 'evidently.'

Thus अभिषन्ति, निषन्ति विषन्ति, प्रादुःषन्ति; अभिष्यात्, निष्यात्, विष्यात्, प्रादुःष्यात् ॥

Why do we say "when it is followed by a vowel or य्" ? Observe निस्तः, विस्तः, प्रादुस्तः ॥

५६ अस भुवि ।

56 √asa, to be.

Pre. अस्ति । स्तः । सन्ति । असि । स्थः । स्थ । अस्मि । स्वः । स्मः । Per. बभूव or आस । आसतुः । आसुः । आसिथ । आसथुः । आस । आस । आसिव । आसिम । I Fut. भविता । II Fut. भविष्यति । Imp. अस्तु or स्तात् । स्ताम् । सन्तु । एधि or स्तात् । स्तं । स्त । असानि । असाव । Imper. आसीत् । आस्ताम् । आसन् । आसीः । आसम् । आस्व । Pot. स्यात् । स्यातां । स्युः । स्याः । स्याम् । स्याव । Bene. भूयात् । Aor. अभूत् । अभूवन् । अभूः । Cond. अभविष्यत् । Pass. भूयते । Cau. अस्तेःस्थाने भूरादेशात् अन्यानि रूपाणि भूधातोर्ज्ञेयानि । Nouns :—नास्तिकः नास्तिबाधकः वास्तिनास्ती ।

56 √asa. This root is Atmanepadi, also, when preceded by व्यति ।

Pre. व्यतिस्ते । व्यतिषाते । व्यतिषते । व्यतिसे । व्यतिषाथे । व्यतिध्वे । व्यतिहे । व्यतिस्वहे । Imper. व्यत्यसै ।

57 √mṛijû to wipe, wash off, cleanse. The ऋ gets vṛiddhi by the following sûtra :—

२४७३ । मृजेर्वृद्धिः । ७ । २ । ११४ ।

मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे । 'क्ङित्यजादौ वेष्यते' । 'व्रश्च-' (२९४) इति षः । मार्ष्टि । मृष्टः । मृजन्ति-मार्जन्ति । ममार्ज । ममार्जतुः-ममृजतुः । ममार्जिथ-ममार्ष्ठ । मार्जिता-मार्ष्टा । मृड्ढि । अमार्ट् । अमार्जम् । अमार्जीत्-अमार्क्षीत् । 'रुदिर् ५८ अश्रुविमोचने' ।

2473. The Vṛiddhi (आर्) is substituted for the root vowel (ऋ) of the stem मृज् before any affix that is ordained after a root, provided it is not कित् or ङित् ।

As मार्ष्टा, मार्ष्टुम्, मार्ष्टव्यम् । The मज् here is a root, and the affixes before which this Vṛiddhi takes place are those which come after *roots*, and not which come after Prâtipadikas. Therefore, not before the affixes भ्यां &c. as कंसपरिमड्भ्याम्, मड्भिः । The anuvṛitti of the word vibhakti has ceased. This sûtra debars guṇa of VII. 3. 84.

Ishṭi :—The vṛiddhi is optional before a कित् or ङित् affix whose first letter is a vowel.

The ज is changed to ष by VIII. 2. 36. S. 294. Thus मज् + ति = मार्ज् + ति = = मार्ष् + ति = मार्ष्टि ।

मृजू ५७ शुद्धौ ।

57 √mṛijû, to wipe or wash off, cleanse.

Pre. मार्ष्टि । मृष्टः । मृजन्ति or मार्जन्ति । मार्क्षि । मृष्ठः । मृष्ठ । मार्ज्मि । मृज्वः । मृज्मः । Per. ममार्ज । ममार्जतुः or ममृजतुः । ममृजुः or ममार्जुः । ममार्जिथ or ममार्ष्ठ । ममार्जिव, ममृजिव or ममृज्व । I Fut. मार्जिता, मार्ष्टा । II Fut. मार्जिष्यति, मार्क्ष्यति । Imp. मार्ष्टु or मृष्टात् । मृष्टां । मृजन्तु or मार्जन्तु । मृड्ढि । मार्जानि । मार्जाव । मार्जाम । Imper. अमार्ट् । अमृष्टाम् । अमृजन् or अमार्जन् । अमार्ट् । अमार्जम् । अमृज्व । Pot. मृज्यात् । मृज्याताम् । मृज्याः । मृज्यां । Bene. मृज्यात् । मृज्यास्ताम् । Aor. अमार्जीत् or अमार्क्षीत् । अमार्जिष्टाम् or अमार्ष्टाम् । अमार्जिषुः or अमार्क्षुः । अमार्जीः or अमार्क्षीः । अमार्जिषम् or अमार्क्षम् । Con. अमार्जिष्यत्, अमार्क्ष्यत् । Pass. मृज्यते । Cau. मार्जयति । Aorist. अमीमृजत् or अममार्जत् । Des. मिमृक्षति, मिमार्जिषति । Int. मरीमृज्यते । yaṅluk मरीमार्जीति or मरिमार्ष्टि or मरीमृजीति । Nouns :—अपामार्गः । मार्जारः । मार्जालीयः । मृजा । Pre. Part. Par. मार्जन्, मृजन् । Past. Par. Pass. मृष्टः । Act. मृष्टवान् । Ger. मार्जित्वा, मृष्ट्वा ।

58 √rud ir, to weep, to shed tears.

This रुद् + ति । Now applies the following sûtra by which इट् is added even in Sârvadhâtuka affixes :—

२४७४ । रुदादिभ्यः सार्वधातुके । ७ । २ । ७६ ।

'रुद्' 'स्वप्' 'श्वस्' 'अन्' 'जक्ष्' एभ्यो वलादेः सार्वधातुकस्येट् स्यात् । रोदिति । रुदितः । हौ परत्वादिटि धित्वं न । रुदिहि ।

2474. A sârvadhâtuka affix beginning with a consonant other than a य, gets the augment इट् after the root रुद्, and the four that follow it namely स्वप्, श्वस्, अन् and जक्ष ।

Thus रोदिति, स्वपिति, श्वसिति, प्राणिति, जक्षिति । But जागर्ति which is beyond the five, and स्वप्स्यति before ârdhadhâtuka affixes, and रुदन्ति before a vowel beginning affix.

The dual is रुदितः । The हि is not changed to धि by VI. 4. 101. S. 2425 by the सकृद्गत paribhâsha, as the इट् augment is subsequently taught. Or in the sûtra VI. 4 101. S. 2425 we may read the anuvṛitti of हल्, and it is only when हि begins with a हल्, that the rule will apply. Here by the addition of इट् the affix हि becomes ajâdi ; and so that rule has no scope. Thus रुदिहि

In the Imperfect there are ईट् and अट् augments by the following two sûtras.

२४७५ । रुदश्च पञ्चभ्यः । ७ । ३ । ९८ ।

हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात् ।

2475. After रुद् and the four roots that follow it, comes the augment ईट् to a sârvadhâtuka affix consisting of a single consonant.

२४७६ । अड्गार्ग्यगालवयोः । ७ । ३ । ९९ ।

अरोदीत्-अरोदत् । अरुदिताम् । अरुदन् । अरोदीः-अरोदः । प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामन्तरङ्गत्वाद्यासुट् । रुद्यात् । अरुदत्-अरोदीत् ।

'ञिष्वप् ५८ शये' । स्वपिति । स्वपितः । सुष्वाप । सुषुपतुः । सुषुपुः । सुष्वपिथ-सुष्वप्थ ।

2476. According to the opinion of Gârgya, and Gâlava, the augment अट् comes before a Sârvadhâtuka affix consisting of a single consonant, after the above five roots रुद &c.

Thus we have अरोदीत् with ईट्, or अरोदत् with अट् added to रु । Similarly अरोदीः or अरोदः ।

Note :—As अरोदीत्, अरोदीः, अस्वपीत् and अस्वपीः, अश्वसीत्, अश्वसीः, प्राणीत्, प्राणीः, अजक्षीत्, अजक्षीः ॥ Why of these five only? Observe अजागर् भवान् ॥ Why an aprikta affix? Observe रोरुदिति ॥ The word रुदः in the preceding sûtra is singular, though it ought to have been plural.

Note :—As अरोदत् अरोदः, अस्वपत् अस्वपः, अश्वसत् अश्वसः, प्राणत् प्राणः, अजक्षत् अजक्षः ॥ The names of Gârgya aud Gâlava are mentioned for honoris oausa.

Note :—The mention of these names is not for the sake of "option" (विकल्पार्थम्). Because the very injunction about अट्, would make the ईट् of the preceding sûtra optional. The mention of more than one Achârya in the sûtra is also for this very reason.

In the Potential, the यासुट् augment is added first to the affix, because it is antaranga, as it depends merely on the Mood लिङ्, while with regard to it, the ईट् and अट् augments are Bahiranga, because they depend on a particular base (prakṛiti such as √*rud* &c.) and a particular affix (pratyaya, namely only those which are apṛikta). Therefore ईट् and अट् augments, though taught subsequent to यासुट् augment, do not debar it, because they are of weaker force compared with it. Therefore यासुट् is added first, and the 3rd Per. S. affix becomes यात्, which being no longer apṛikta, there is no occasion for adding to it the augments ईट् or अट् of these two sûtras. Thus we have रुद्यात् ।

The aorist is अरुदत् or अरोदीत्,

रुदिर् ५८ अश्रुविमोचने ।

58√rudir to weep, to cry.

Pre. रोदिति । रुदितः । रुदन्ति । रोदिषि । रुदिथः । रुदिथ । रोदिमि । रुदिवः । रुदिमः । Per. रुरोद । रुरुदतुः । रुरुदुः । रुरोदिथ । रुरुदथुः । रुरुद । रुरोद । रुरुदिव । रुरुदिम् । I Fut. रोदिता । II Fut. रोदिष्यति । Imp. रोदितु or रुदितात् । रुदिताम् । रुदन्तु । रुदिहि । रुदितम् । रुदित । रोदानि । रोदाव । रोदाम । Imp. अरोदीत् or अरोदत् । अरुदिताम् । अरुदन् । अरोदीः or अरोदः । अरुदितं । अरुदित । अरोदम् । अरुदिव । अरुदिम । Pot. रुद्यात् । रुद्यातां । रुद्युः । रुद्याः । रुद्यातम् । रुद्यात । रुद्याम् । Ben. रुद्यात् । रुद्यास्ताम् । Aor. अरुदत् or अरोदीत् । अरुदताम् or अरोदिष्टाम् । अरुदन् । अरुदः अरुदम् । अरुदाव । Con. अरोदिष्यत् । Pass. रुद्यते । Cau. रोदयति । Aorist. अरूरुदत् । Des. रुरुदिषति । In. रोरुद्यते । Yañ luk रोरुदीति or रोरोत्ति । Du. रोरुत्तः । Imper. अरोरोत् । Nouns :—रोदसी । रुद्राणी । रुद्रः । शतरुद्रीयम् ।

59√ñi ṣhvap to sleep.

The Present is स्वपिति । स्वपितः &c. The Perfect is सुष्वाप । सुषुपतुः । सुषुपुः । &c. When the root takes the upasargas सु or वि or निर् or दुर् then the स of the vocalised सु in the Perfect is changed to ष by the following :—

२४७७ । सुविनिर्दुर्भ्यः सुपिसूतिसमाः । ८ । ३ । ८८ ।

एभ्यः सुप्यादेः सस्य षः स्यात् । 'पूर्वं धातुरुपसर्गेण युज्यते' । किति लिटि परत्वात्संप्रसारणे षत्वे च कृते द्वित्वम् । × पूर्वत्रासिद्धीयमद्विर्वचने × । सुषुषुपतुः । सुषुषुपुः । अकिति तु द्वित्वेऽभ्यासस्य संप्रसारणम् । षत्वस्यासिद्धत्वात्ततः पूर्वं 'हलादिः शेषः' (२१७९) । नित्यत्वाच्च । ततः सुपि रूपाभावान्न षः । सुसुष्वाप । सुस्वप्ता । अस्वपीत्-अस्वपत् । स्वप्यात् । सुप्यात् । सुषुप्यात् । अस्वाप्सीत् । 'श्वस ६० प्राणने' । श्वसिति । श्वसिता । अश्वसीत्-अश्वसत् । श्वस्याताम् । श्वस्यास्ताम् । 'ह्यन्तक्षण-' (२२९९) इति न वृद्धिः । अश्वसीत् । 'अन ६१ च' । अनिति । आन । अनिता । आनीत्-आनत् ।

2477. The स् of स्वप् when it assumes the form सुप्, and of सूति, and सम is changed to ष् after सु, वि, निर् and दुर् ॥

The maxim is that the root is first joined with the upasarga, and then grammatical rules applied. Thus the compound verbs are सुस्वप्, विस्वप् &c. To this when the affixes of the Perfect which are कित् are added, then first there is vocalisation of व into उ, and स changed to ष, and then reduplication. That is the steps are (1) सुसुप् (2) सुषुप्, (3) सुषुप् षुप् । For the purposes of reduplication the स changed to ष by the rule of Tripâdi ought to have been considered asiddha by VIII. 2. 1. This is prevented by the maxim already given under S. VI. 1. 3. *i. e.*, for the purposes of reduplication, the Tripâdi rules are not asiddha. Therefore ष is reduplicated. Thus we have the following equation: सु + स्वप् + अतुस् = सुसुप् + अतुस् (VI. 1. 15. S. 2409) = सु + षुप् + अतुस् (VIII. 3. 88. 2477) = सुषुप्षुप् + अतुस् (पूर्वत्रासिद्धीयमद्विर्वचने) = सुषुषुपतुस् । So also सुषुषुपुः ।

Before those affixes of लिट् which are not कित्, there is reduplication first, and then vocalisation of the abhyâsa. The ष change ordained by the present Tripâdi sûtra being considered asiddha (VIII. 2. 1.); the हलादिशेषः (S. 2179) rule applies prior to it. And because it is a *nitya* rule also, therefore it applies first. When हलादिशेषः has applied, there remains no *form* सुप् but only सु, and therefore the present rule does not apply, and there is no ष change. Thus सुस्वप् + णल् = सुस्वप्स्वप् + णल् = सुसुप्स्वप् + णल् = सुसुस्वप् + णल् (S. 2179). Now the second सु cannot be changed to षु by the present sûtra because the condition for the application of this rule, namely the existence of the form सुप् is absent. Thus we get सुषुष्वाप and सुष्वप्त ।

Note :—The word सुपि is exhibited in the sûtra as the form of स्वप् with vocalisation. Thus सुषुप्तः, निः षुप्तः, दुः षुप्तः ॥ The word सूति is the क्तिन् ending form of सू; the rule applies to this form only, as सुषूतिः, विषूतिः, निषूतिः and दुःषूतिः ॥ The word सम also means the *noun* सम and not the verb सम स्तम वैक्लव्ये ॥ Thus सुषमम. विषमम्, निःषमम्, दुःषमम् ॥

Note :—The following kârikâ sums up the above discussion.

Kârikâ:—सुपेः षत्वं स्वपेर्मा भूद्विषुष्वापेति केन न ।
हलादिशेषान्न सुपिरिष्टं पूर्वं प्रसारणम् ॥
स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः ।
अनर्थके विषुषुपः षुपिभूतो द्विरुच्यते ॥

Kârikâ—Why is षत्व taught with regard to the सुप् form of स्वप् ? *Ans*. सुपेः षत्वं स्वपेर्मा भूत्, so that the षत्व change should not take place in स्वप् form, as विस्वप्नः and विस्वप्नक् (III. 2. 172). *Q*. विषुष्वापेति केन न ? For what reason the षत्व change has not taken place in the reduplicate विषुष्वाप, for here also in the reduplicate, is the form सुप्, as विसुप्स्वप्, and then by applying हलादिशेष rule, the प् is elided, and एकदेशविकृतस्यानन्यत्वात् applies ? *Ans*. हलादि शेषान् न सुपिः, we reduplicate the form स्वप् as विस्वप्स्वप् and then elide प् as विस्वस्वप्, and then vocalise, as विसुस्वप्, so that there being no form सुप्, there is no षत्व ॥ इष्टं पूर्वं प्रसारणं, in fact, the vocalisation takes place first, and then elision according to an ishṭi. See VI. 1. 17. Otherwise, in स्वप् स्वप्, as प् is elided, व् would also have been elided. Why is the स of विषुष्वाप not changed to ष by VIII. 3. 64 ? स्थादीनां नियमो नात्र प्राक् सितादुत्तरः सुपिः, the rule VIII. 3 64 does not apply, because that rule is confined only to verbs up to सित in VIII. 3. 70, while सुप् is *after* that verb. Moreover the प् of सुप् being elided, the mere सु is अनर्थक, and the maxim is अर्थवद् ग्रहणे नानर्थकस्य ॥ *Q*. If this maxim is applied, how do you form विषुषुपः ? *Ans*. अनर्थके विषुषुपः षुपिभूतोद्विरुच्यते, here the form षुप् is doubled, and not सुप् ॥ The root is first joined with the affix वि + स्वप्, then there is vocalisation विसुप् then there is ष change, as विषुप्, then reduplication, as विषुप्षुप् ॥ Now षत्व being considered asiddha, the doubling should take place first ? No, for we have already shown that for the purposes of doubling, the षत्व change is not asiddha (VIII. 2. 3 Vârt.)

ञिष्वप् ५९ शये।

59 √ ñishvap to lie down, to sleep.

Pre. स्वपिति। स्वपितः। स्वपन्ति। स्वपिषि। स्वपिथः। स्वपिथ। स्वपिमि। स्वपिवः। स्वपिमः। Per. सुष्वाप। सुषुपतुः। सुषुपुः। सुष्वप्थ or सुष्वपिथ। सुषुपथुः। सुषुप। सुष्वाप। सुषुपिव। सुषुपिम। I Fut. स्वप्ता। II Fut. स्वप्स्यति। Imp. स्वपितु। स्वपिताम्। स्वपन्तु। स्वपिहि। स्वपितम्। स्वपित। स्वपानि। स्वपाव। स्वपाम। Imperfect अस्वपत् or अस्वपीत्। अस्वपिताम्। अस्वपन्। अस्वपः or अस्वपीः। अस्वपितम्। अस्वपित। अस्वपम्। अस्वपिव। अस्वपिम। Pot स्वप्यात्। स्वप्याताम्। Bene. सुप्यात्। सुप्यास्ताम्। Aorist अस्वाप्सीत्। अस्वाप्ताम्। अस्वाप्सुः। अस्वाप्सीः। अस्वाप्सम्। Con. अस्वप्स्यत्। Pass. सुप्यते। With the Preposition सु, we have सुषुप्यते। Cau. स्वापयति। Aorist असूषुपत्। Des. सुषुप्सति। With वि, we have विषुषुप्सति। Inten. सोषुप्यते। (VI. 1. 19. S. 2645.) विषोषुप्यते। Yan luk. सास्वपीति। Nouns :—स्वप्नः।

श्वस् ६० प्राणने।

60 √ śvas to breathe. In the Potential, the root is conjugated like the Bhuadi, the vikaraṇa शप् is not elided. This is the view of the Mâdhavîya. Bhattoji would elide शप् here also. The Potentials would according to him be श्वस्यात्, D. श्वस्याताम् &c.

Pre. श्वसिति। श्वसितः। श्वसन्ति। श्वसिषि। श्वसिमि। Per. शश्वास। शश्वसतुः। शश्वसिथ। शश्वस। शश्वास। शश्वसिव। I Fut. श्वसिता। II Fut. श्वसिष्यति। Imperative श्वसितु। श्वसिहि। श्वसानि। Imper. अश्वसत् or अश्वसीत्। अश्वसिताम्। अश्वसीः। अश्वसः। अश्वसम्। अश्वसिव। Poten. श्वसेत्। श्वसेतां। श्वसेयुः। श्वसेः। श्वसेयम्। Bene. श्वस्यात्। श्वस्यास्ताम्। Aorist अश्वसत्। or अश्वसीत्। (There is no vriddhi because of S. 2299). अश्वसिष्टाम्। अश्वसीः। अश्वसिषम्। Condi. अश्वसिष्यत्। Pass. श्वस्यते। Caus. श्वासयति। Aorist अशिश्वसत्। Deside. शिश्वसिषति। Inten. शाश्वस्यते। yaṅ luk शाश्वसीति। Nouns:—श्वसनः। आश्वस्तः। श्वासः।

61 √ ana to breathe.

The Pre. is अनिति, Perf. आन, I Fut. अनिता, Imper. आनीत् or आनत्.

The न of this root is changed to ण after an alterant preposition by the following sûtra.

२४७८। अनितेः। ८। ४। १९।

उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्राणिति।

'जक्ष ६२ भक्षहसनयोः'। जक्षिति। जक्षितः।

2478. The न of the verb अन् 'to breathe', is changed into ण, when preceded by an upasarga competent to produce the change.

Thus प्र+अनिति=प्राणिति 'he breathes.' पराणिति ॥ For इट् augment, see VII. 2 76.

अन ६१ च (प्राणने) ।

61√ana to breathe.

Pre. अनिति । अनितः । अनन्ति । अनिषि । अनिमि । Per. आन (प्र+आन=प्राण) प्राणतुः । प्राणुः । प्राणिथ । प्राणिव । I Fut. अनिता । II Fut. अनिष्यति । Imperative प्र+अनितु or प्राणितात् । Imper. आनीत्, आनत् । Poten. अन्यात् । प्राणयात् । Bene. अन्यात् । प्राणयात् । प्राणयास्ताम् । Aorist आनीत् । प्राणीत् । प्राणिष्टाम् । प्राणीः । Condi. आनिष्य । Pass. अन्यते । Caus. आनयति । प्राणयति । Aorist प्राणिणत् । Deside. अनिनिषति । प्राणिणिषति । Nouns—प्राणः ।

62.√jakṣha 'to eat,' when it is the reduplicated form of घस्; and 'to laugh,' when it is the reduplicated form of हस् ।

The Pre. Sing. is जक्षिति, Dual. जक्षितः । In the plural the अन्त् is replaced by अत् by the following.

२४७९ । अदभ्यस्तात् । ७ । १ । ४ ।

झस्य अत्स्यात् । अन्तापवादः । जक्षति । 'सिजभ्यस्त-' (२२२६) इति झेर्जुस् । अजक्षुः । अदमन्तःस्यादिरित्युज्ज्वलदत्तो बभ्राम । रुदादयः पञ्च गताः ।

2479. अत् is substitute for झ after a reduplicated verbal stem.

This debars the अन्त substitution required by VII. 1. 3. S. 2169. Thus जक्ष्+झि=जक्षति । In the Imperfect Plural however जुस् replaces झि by III. 4. 109. S. 2226. As अजक्षुः ।

Ujjvaladatta gives this root as यक्ष, and not जक्ष which is a mistake.

जक्ष ६२ भक्षहसनयोः ।

62√jaksha 1. to eat 2. to laugh.

Pre. जक्षिति । जक्षितः । जक्षति । जक्षिषि । जक्षिमि । Per. जजक्ष । जजक्षिथ । जजक्षिव । I Fut. जक्षिता । II Fut. जक्षिष्यति । Imperative जक्षितु । जक्षितां । जक्षतु । जक्षिहि । जक्षाणि । Imper. अजक्षीत्, अजक्षत् । अजक्षिताम् । अजक्षुः । Poten. जक्ष्यात् । जक्षेत् according to Chandra. जक्ष्याताम् । Bene. जक्ष्यात् । जक्ष्यास्ताम् । Aorist अजक्षीत् । अजक्षिष्टाम् । अजक्षीः । अजक्षिषं । Condi. अजक्षिष्यत् । Pass. जक्ष्यते । Caus. जक्षयति । Aorist अजिजक्षत् । Deside. जिजक्षिषति । Inten. जाजक्ष्यते । yañ luk जाजक्षीति or जाजष्टि । Noun:—जक्षत् ।

Here end the five roots beginning with √rud.

'जागृ ६३ निद्राक्षये' । जागर्ति । जागृतः । जाग्रति । 'उषविद-' (२३४१) इत्याम्वा । जागरांचकार-जजागार ।

63√jâgṛi to awake.

The Pre. is जागर्ति, Dual. जागृतः, Pl. जाग्रति । In the Perfect there is optionally Periphrastic आम् by III. 1. 38. S. 2341. As जागरां चकार or जजागार । In the dual, we have guṇa by the following:

२४८० । जाग्रोऽविचिण्णल्ङित्सु । ७ । ३ । ८५ ।

जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये प्रतिषेधविषये च । जजागरतुः । अजागः । अजागृताम् । अभ्यस्तत्वाज्जुस् ।

2480. The Guṇa (instead of Vṛiddhi or its prohibition) is substituted for the ऋ of the stem जागृ, except before the affix वि, before the Aorist character चिण्, before the Personal ending णल् of the Perfect, and before an affix with an indicatory ङ् ॥

Thus जजागरतुः । The Imperfect is अजागः । D. अजागृताम् । In the plural, the root being a reduplicated one we have जुस् by VII. 1. 4. S. 2479. Before this जुस्, the ऋ of jâgṛi takes guṇa by the following:

२४८१ । जुसि च । ७ । ३ । ८३ ।

अजादौ जुसीगन्ताङ्गस्य गुणः स्यात् । अजागरुः । 'अजादौ' किम् । जागृयुः । आशिषि तु जागर्यात् । जागर्यास्ताम् । जागर्यासुः । लुङि अजागरीत् । 'जागृ इस' इत्यत्र यणप्राप्तः, तं सार्वधातुकगुणो बाधते, तं सिचि वृद्धिः, तां जागर्तिगुणः, तत्र कृते हलन्तलक्षणा प्राप्ता, 'नेटि' (२२६८) इति निषिद्धा, ततः 'अतो हलादेः–' (२२८४) इति बाधित्वा 'अतो ल्रान्तस्य' (२३३०) इति प्राप्ता, 'ह्म्यन्त–' (२२९९) इति निषिध्यते । तदाहुः—

'गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् ।
पुनर्वृद्धिर्निषेधोऽतो यणपूर्वाः प्राप्तयो नव ॥'

इति । 'दरिद्रा ६४ दुर्गतौ' । दरिद्राति ।

2481. Before the personal-ending जुस् (उस्) of the Imperfect when it begins with a vowel, guṇa is substituted for the final इ, ई, उ, ऊ, ऋ, ॠ, and ऌ of the stem.

Note:—As अजुहवुः, अबिभयुः, अबिभरुः, अजागरुः ॥ This Personal ending is ङित् according to I. 2. 4, and would not have caused guṇa (I. 1. 5), but for this sûtra. The ending जुस् (III. 4. 108) comes in the लिङ् also. There, however, it does not cause guṇa. As चिनुयुः, सुनुयुः ॥ Here there are two ङित् affixes, the augment यासुट्, and the sârvadhâtuka जुस्; and the यासुट् prevents guṇa. The इक् is read into the sûtra from I. 1. 3.

As अजागरुः । Why do we say that the affix जुस् must be ajâdi or vowel-beginning? When this affix takes the augment यासुट् of the Potential, it assumes the form युस्, and is no longer vowel-beginning. Before it, there will be no guṇa. As जागृयुः । The Ben. forms are जागर्यात्, D. जागर्यास्ताम्, Pl. जागर्यासुः । The Aorist is अजागरीत् । It is thus evolved:

जागृ+इ+स्+ईत्. The ऋ followed by इ required to be changed to र् by VI. 1. 77. This is prevented by the Guṇa rule VII. 3. 84. S. 2168. The ऋ ought to become अर् । This guṇa however is set aside by the Vṛiddhi rule VII. 2. 1. S. 2297.

This vṛiddhi, however, is set aside by peculiar guṇa of jâgṛi under VII. 3. 85. S. 2480. Thus we get जागर् +इ+स्+ईत्

Now the root being जागर् ending in a consonant, sûtra VII. 2. 3. S. 2267 requires the vṛiddhi of अ; but this vṛiddhi, in its turn is set aside by VII. 2. 4. S. 2268. But now VII. 2. 7. S. 2284 requires *optional* vṛiddhi; but it is restricted by VII. 2. 2. S. 2330, and the vṛiddhi becomes compulsory. But VII. 2. 5. S. 2299 sets aside this vṛiddhi also. Thus.

जागृ+इस्=जाग्र्+इस्(VI.1.77. S 47)=जागर्+इस् (VII. 3. 84. S. 2168)=जागार् +इस् (VII. 2. 1. S. 2297)=जागर्+इस् (VII. 3.85. S. 2480)=जागार्+इस् (VII. 2.3. S. 2267) =जागर्+ इस् (VII. 2. 4. S. 2268)= जागार or जागर्+इस् (VII. 2. 7. S. 2284) =जागार्+इस् (VII. 2. 2. S. 2330)=जागर्+इस् (VII. 2. 5. S. 2299).

The following verse sums up these.

"Guṇa Vṛiddhi, Guṇa, Vṛiddhi, prohibition, option, again Vṛiddhi and then exception, these, with the change of *ṛi* into a semi vowel in the first instance, are the nine results."

जागृ ६३ निद्राक्षये ।

63. √ jâgṛi to wake.

Pre. जागर्ति । जागृतः । जाग्रति । जागर्षि । जागर्मि । जागृवः । Per. जागराञ्चकार, जजागार, । जजागरतुः । जजागरुः । जजागरिथ । जजागरथुः । जजागर । जजागार । जजागरिव । I Fut. जागरिता । II Fut. जागरिष्यति । Imperative जागर्तु or जागृतात् । जागृतां । जाग्रतु । जागृहि । जागराणि । Imper. अजागः । अजागृताम् । अजागरुः । अजागः । अजागरम् । अजागृव । Poten. जागृयात् । जागृयाताम् । जागृयुः । जागृयाः । जागृयां । जागृयाव । Bene. जागर्यात् । जागर्यास्ताम् √Aorist अजागरीत् । अजागरिष्टाम् । अजागरिषुः । अजागरीः । अजागरिषं । Condi. अजागरिष्यत् । Pass. जागृयते । Caus. जागरयति । Aorist अजजागरत् । Deside. जिजागरिषति । Inten. जागर्यते । Nouns :—जागरूकः । जागरा । जागर्या । जागृविः । जजागृवान् । Past. Part. Pass. जागरितः । Act. जागरितवान् । Fut. Part. जागरिष्यन् । Gerund जागरित्वा । Infini. जागरितुं । Adj. जागरितव्यं । जागरणीयं । जागर्यम् ।

64. √ daridrâ to be poor. The Present 3rd Singular is दरिद्राति । In forming the Dual, the आ is replaced by इ, by the following:

२४८२ । इद्दरिद्रस्य । ६ । ४ । ११४ ।

दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके । दरिद्रितः ।

2482. इ is substituted for the आ of दरिद्रा before a Sârvadhâtuka कित् or ङित् affix beginning with a consonant.

Thus दरिद्रितः, दरिद्रिथः, दरिद्रिवः, दरिद्रिमः ॥ But दरिद्रति before a vowel affix (VI. 4. 112) and दरिद्राति before a non-ङित् affix.

In forming the plural, the आ is elided before the affix अति (VII. 1. 4. S. 2479), by the following sûtra:—

२४८३ । श्नाभ्यस्तयोरातः । ६ । ४ । ११२ ।

अनयोरातो लोपः स्यात्क्ङिति सार्वधातुके । दरिद्रति । अनेकाच्त्वादाम्वा । दरिद्रांचकार । 'आत औ णलः' (२३७१) इत्यत्र 'ओ' इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थम् । अत एव ज्ञापकादाम्नेत्येके । ददरिद्रौ । ददरिद्रतुरित्यादि । यत्तु णलि ददरिद्रेति तन्निर्मूलमेव । * दरिद्रातेरार्धधातुके विवक्षित आलोपो वाच्यः * । * लुङि वा * । * सनि ण्वुलि ल्युटि च न * । दरिद्रिता । अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । दरिद्रियात्–दरिद्र्यात् । अदरिद्रीत् । इट्सकौ । अदरिद्रासीत् ।

2483. Before a Sârvadhâtuka क्ति or ङित् affix beginning with a vowel, the long आ of श्ना (the vikarana of the 9th class) and of the reduplicate stems is elided.

Note:—Thus लुनते, लुनताम्, अलुनत, मिमते, मिमताम्, अमिमत, संजिहते, संजिहताम् and समजिहत ॥ Why do we say 'of श्ना and the reduplicates?' Observe यान्ति वान्ति ॥ Why 'of long आ?' Observe बिभ्रति ॥ Why 'before क्ङित् and ङित्?' Observe, अलुनात्, अजहात् ॥

Thus दरिद्रा+झि=दरिद्रा+अति (VII. 1. 4. S. 2479)=दरिद्रति (VI. 4. 112. S. 2486).

As the root is polysyllabic, its Perfect is formed periphrastically by आम् by the vârtika under III. 1. 35. S. 2306. Thus दरिद्रांचकार । Some say the Perfect is formed regularly, because of the implication of the sûtra आत औ णलः (VII. 1. 34. S. 2371). There the sûtra teaches the substitution of औ for णल्, while the same form like पपौ, दधौ &c. could have been evolved by the substitution of ओ for णल् । The fact that औ is taught there and not ओ indicates that औ is to be heard even in the root daridrâ when the final आ is elided. They form the Perfect as ददरिद्रौ । Dual ददरिद्रतुः &c. But the form ददरिद्र in णल् is wrong and without authority.

Vârt.—The final of दरिद्रा is elided before an Árdhadhâtuka affix. And this elision should be considered as siddha, in applying rules relating to affixes. Thus दरिद्रा by loosing आ becomes दरिद्र्, and we should apply those affixes which would come after a form like 'daridr', and not what would have come after a form like 'daridrâ.' Thus ण comes after roots ending in long आ (III. 1. 141): but this affix would not be applied here, but the general affix अच् (III. 1. 134). Thus दरिद्राति=दरिद्रः

Vârt.—Optionally so in the Aorist (adyatana-past) as अदरिद्रीत् or अदरिद्रासीत्. The latter form is evolved by adding सक् of VII. 2. 73. S. 2377 and elision of सिच् ॥ The form दरिद्रस्य in the sûtra is Vedic, the root being shortened from दरिद्रा to दरिद्र ॥

Vârt.—The elision does not take place in the forms दरिद्रायक and दरिद्राण, and the Desiderative may be either दिदरिद्रासति or दिदरिद्रिषति ॥ To sum up "आ of दरिद्रा should be considered as elided when applying an ârdhadhâtuka affix, but optionally so before लुङ् (Aorist), and not at all before सन् (Desiderative), ण्वुल and ल्युट" ॥

Therefore the first Future is दरिद्रा+इट्+ता=दरिद्र्+इ+ता (*vârtika*)=दरिद्रिता The Imperfect is अदरिद्रात्, D. अदरिद्रिताम्, pl. अदरिद्रुः ।

दरिद्रा ६४ दुर्गतौ ।

64 √daridrâ to be poor.

Pre. दरिद्राति । दरिद्रितः । दरिद्रति । दरिद्रासि । दरिद्रिथः । दरिद्रिथ । दरिद्रामि दरिद्रिवः । Per. दरिद्रांचकार । I Fut. दरिद्रिता । II Fut. दरिद्रिष्यति । Imperative दरिद्रातु or दरिद्रितात् । दरिद्रितां । दरिद्रिहि । दरिद्राणि । Imper. अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । अदरिद्राः । अदरिद्राम् । Poten. दरिद्रियात् । दरिद्रियाताम् । Bene. दरिद्रियात् or दरिद्रात् । दरिद्रास्ताम् । Aorist अदरिद्रीत् or अदरिद्रासीत् । अदरिद्रिष्टाम् । अदरिद्रिषुः । अदरिद्रीः । अदरिद्रिषम् । Condi. अदरिद्रिष्यत् । Pass. दरिद्रायते । Aor. अदरिद्रि । or अदरिद्रायि । Both with चिण् । Caus. दरिद्रायति । Deside. दिदरिद्रासति, दिदरिद्रिषति । Inten. दिदरिद्रायते । Nouns:—दर्द्रू । दरिद्रः । दर्द्रूणः । दरिद्राणः । दरिद्रायकः । Past Part. दरिद्रितः । Act. दरिद्रितवान् ।

'चकासृ ६५ दीप्तौ' । झस्य अत् । चकासति । चकासां चकार । 'धि च' (२२४९) इति सलोपः । सिच एवेत्येके । चकाद्धि । 'चकाधि' इत्येव भाष्यम् ।

65 √chakâ ṛi to shine. In the 3rd Person plural, the झ is replaced by अत् by VII. I. 4. S. 2479. as चकासति । The Perfect is चकासां चकार । In the 2nd Person Singular of the Imperative, the स् of चकास् is elided by VIII. 2. 25. S. 2249. As चकाधि । Others say that the स of सिच् only is elided by that sûtra, and they give the form as चकाद्धि where स is changed to द । But in the Mahâbhâshya the form given is चकाधि । In the Imperfect 3rd Singular, the स becomes द by the following sûtra.

२४८४ । तिप्यनस्तेः । ८ । २ । ७३ ।

पदान्तस्य धातोः सस्य दः स्यात्तिपि न त्वस्तेः । अचकात्-अचकाद् । अचकासुः ।

2484. द is substituted for the final स् of a root, with the exception of अस्, before the Personal ending ति (त्), when it stands at the end of a word.

Note:—The स् of a root can stand at the end of a word when the Personal-ending is dropped. Thus अचकाद् भवान्, अन्वशाद् भवान्, from the roots चकास् and शास् ॥ The Personal affix is elided by VI. 1. 68, and thereby स comes to stand at the end of a Pada.

Note:—Why do we say 'before तिप्'? Observe चकास् formed by क्विप् affix added to the root.

Note:—Why do we say 'with the exception of अस्'? See आप एवेदं सलिलं सर्वम् आः ॥ Here आः is the Imperfect 3rd Person singular of अस् ॥ The ईट् is not added as a Vedic irregularity. See VII. 3. 93, 97.

This sûtra is an exception to ससजुषोः (VIII. 2. 66. S. 162). Thus we have अचकाद् or अचकात् । The Plural is अचकासुः by जुस् (S. 2226). In the 2nd Person singular, the स् is either changed to द or रु by the following:—

२४८५ सिपि धातो रुवा । ८ । २ ॥ ७४ ॥

पदान्तस्य धातोः सस्य रुः स्याद्वा । पक्षे [जश्त्वेन] दः । अचकाः-अचकात् ।

2585. द् or रु may optionally be substituted for the स् of a root, before the Personal ending सि (स्), when such स् stands at the end of a Pada.

Thus अचकास् त्वम् or अचकात् त्वम्, अन्वशास् त्वम् or अन्वशात् त्वम् ॥ For the रु is first substituted visarjaniya, which is then changed to स् ॥

The word धातोः is employed in the sûtra for the sake of the subsequent sûtras: so also the word रु ॥

चकासृ ६५ दीप्तौ ।

65 √ chakâsṛi to shine.

Pre. चकास्ति । चकास्तः । चकासति । चकास्सि । चकास्मि । चकास्वः । Per. चकासाञ्चकार । I Fut. वकासिता । II Fut. चकासिष्यति । Imperative चकास्तु । चकास्ताम् । चकासतु । चकाधि । Imper. अचकात् । अचकास्ताम् । अचकासुः । अचकात् or अचकाः । अचकास्तं । अचकास्त । अचकासम् । अचकास्व । अचकास्म । Poten. चकास्यात् । चकास्याताम् । Bene. चकास्यात् । चकास्यास्ताम् । Aorist अचकासीत् । अचकासिष्टाम् । अचकासीः । अचकासिषम् । Condi. अचकासिष्यत् । Des. चिचकासिषति । Caus. चकासयति । Aorist अचीचकासत् ।

'शासु ६६ अनुशिष्टौ' । शास्ति ।

66 √ Śasu to teach.

The Present 3rd Person Singular is शास्ति । In forming the Dual, the आ is replaced by इ by the following sûtra.

२४८६ शास इदङ्हलोः ॥ ६ । ४ । ३४ ॥

शास उपधाया इत्स्यादङि हलादौ क्ङिति च । 'शासिवसि-' (सू २४१०) इति षः । शिष्टः । शासति । शशास । शशासतुः । शास्तु । शिष्टात् । शिष्टाम् । शासतु ।

2486. Before the Aorist in अङ् and before an affix beginning with a consonant having an indicatory क् or ङ्, there is the substitution of इ for the vowel of शास् ॥

Thus शास+तस्=शिस्+तस्=शिष्+तस् (VIII. 3. 60. S. 2410) =शिष्टः । The 3rd Pl. is शासति ।

The Perfect is शशास, D. शशासतुः ।

The Imperative 3rd Singular is शास्तु or शिष्टात् D. शिष्टाम्, Pl. शासतु । In forming 2nd singular, the root शास् assumes the form शा by the following sûtra:

२४८७ शा हौ ॥ ६ । ४ । ३५ ॥

शास्तेः शादेशः स्याद्धौ परे । तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः । शाधि । अशात् । अशिष्टाम् । अशासुः । अशात्-अशाः । शिष्यात् । 'सर्तिशास्ति-' (सू २३८२) इत्यङ् । अशिषत् । अशासिष्यत् ।

2487. Before the Imperative affix हि, शा is substituted for शास् ॥

Thus अनुशाधि, प्रशाधि ॥ The हि is changed to धि by VI. 4. 101. S. 2425, though strictly speaking that rule ought not to apply, as हि does not come after a झल् letter but after the vowel आ of शा। But the substitution of शा for शास् is by a rule of âbhîya section and is asiddha for the purposes of धि substitution. Thus we have शाधि। See VI 4. 22.

Note:—The anuvritti of उपधायाः is not here; so शा is substituted in the room of the full word शास् and not only for the penultimate vowel of शास् ॥ The anuvritti of कित् and ङित् also is not here. Therefore, when this हि is treated as पित् (III. 4. 88), then too the substitution takes place, though a पित् Sârvadhâtuka is not ङित् (1. 2. 4). Thus शाधि is also found in the Vedas as having acute on the first syllable, which can only be when धि is पित् and consequently anudâtta (III. 1. 4)

शासु ६६ अनुशिष्टौ ।

66 √ śasu to teach, instruct, train. This root takes two objects.

Pre. शास्ति । शिष्टः । शासति । शास्सि । शिष्ठः । शिष्ठ । शास्मि । शिष्वः । शिष्मः Per. शशास । शशासतुः । शशासिथ । शशास । शशासिव । I Fut. शासिता । II Fut. शासिष्यति । Imperative शास्तु or शिष्टात् । शिष्टां । शासतु । शाधि । शिष्टं । शिष्ट । शासानि । शासाव । Imper. अशात् । अशिष्टाम् । अशासुः । अशाः, । अशात् । अशिष्टम् । अशासम् । अशिष्व । अशिष्म । Poten. शिष्यात् । शिष्याताम् । Bene. शिष्यात् । शिष्यास्ताम् । Aorist अशिषत् । (by अङ् S. 2382). अशिषताम् । अशिषन् । अशिषः । अशिषतम् । अशिषत । अशिषम् । अशिषाव । अशिषाम । Con. अशासिष्यत् । Pass. शास्यते । Caus. शासयति । Aorist अशशासत् । Deside. शिशासिषति । Inten. शेशिष्यते । yañ luk शाशासीति or शाशास्ति । D. शाशिष्टः । Nouns:—शिष्यः । शास्त्रम् । आशीः । शासनं । Pre. Part. Parasmai. शासन् । Past Part. Pass. शिष्टः । Act. शिष्टवान् । Fut. Part. शासिष्यन् । Gerund शिष्ट्वा । शासित्वा । Infini. शासितुं । Adj. शासितव्यं । शासनीयं । शिष्यम् ।

दीधीङ् ६७ दीप्तिदेवनयोः । एतदादयः पञ्चधातवः छान्दसाः । दीधीते । एरनेकाच इति यण् । दीध्यते ।

67. dídhiṅ to shine.

The five roots commencing with this are found employed in the Chhandas literature.

The Present 3rd Sg. is दीधीते । The dual is दीधी+आते = दीध्याते the ई is changed to य by VI. 4. 82. S. 272. The First Person Singular is दीधी+इट् । Now the following sûtra requires that the ई should be elided before the 1st Per Sg. affix.

२४८८ यीवर्णयोर्दीधीवेव्योः ॥ ७ । ४ । ५३ ॥

एतयोरन्त्यस्य लोपः स्याद्यकार इवर्णे च परे । इति लोपं बाधित्वा नित्यत्वाट्टेरेत्वम् । दीध्ये । 'दीधीवेवीटाम्' (सू २१६०) इति गुणनिषेधः । दीध्यांचक्रे । दीधिता । दीधिष्यते ।

2488. The final of दीधी and वेवी falls before an affix beginning with य्, इ or ई ॥

Note:—Thus आदीध्य and आवेव्य गतः, आदीध्यते, and आवेव्यते before य् ॥ आदीधितृ, आवेवितृ; आदीधीत and आवेवीत ॥ Why before य, इ or ई? Observe आदीध्यनम् and आवेव्यनम् ॥ The long ई in यी is a sûtra वैचित्र, for यिवर्णयोः would have been enough.

But this elision is prevented by the rule which requires the इ to be changed to ए (III. 4. 79. S. 2233). because it is a nitya rule. When इ is changed to ए there is no occasion for the application of this sûtra. Thus we have दीधी+ए=दीध्ये । The Per. is दीधी+आम्+चक्रे । The आम् does not cause the guṇa of the final ई because of the prohibition of I. 1. 6. S. 2190. Thus we have दीध्यांचक्रे ।

दीधीङ् ६७ दीप्तदेवनयोः ।

67 √ dîdhiṅ 1. to shine. 2. to seem, appear.

Pre. दीधीते । दीध्याते । दीध्यते । दीधीषे । दीधीध्वे । दीध्ये । दीधीवहे । Per. दीध्याञ्चक्रे । I Fut. दीधिता । II Fut. दीधिष्यते । Imperative दीधीताम् । दीध्यातां । दीधीष्व । दीध्यै । दीध्यावहै । Imper. अदीधीत । अदीध्याताम् । अदीधीथाः । अदीधि । (ई elided by S. 2488). Poten. दीधीत । दीधीयातां । Bene. दीधीषीष्ट । Aorist अदीधिष्ट । अदीधिष्ठाः । अदीधिषि । Condi. अदीधिष्यत । Pass. दीधीयते । Caus. दीधयति । (दीधी+णिच्+शप्+तिप् No vriddhi by S. 2190 = दीध्+णिच्+शप्+तिप् S. 2488 = दीधि+शप्+तिप् = दीधे+अ+ति). Deside. दिदीधिषते । (ई elided by S. 2488). Inten. देदीध्यते । Nouns :—दीधितिः Pre. Part. Parasmai दीधयन् । Past Part. Pass. दीधीतः । Act. दीधीतवान् । Fut. Part. दीधिष्यमाणः । Gerund दीधीत्वा । Infini. दीधीतुम् । Adject. दीधीतव्यं । दीध्यनीयं । देधीयम् ।

वेवीङ् ६८ वेतिनातुल्ये ।

वीगतीत्यनेन तुल्योऽर्थे वर्तत इत्यर्थः ।

68 √ vevîṅ 'to obtain' 'to conceive,' 'to pervade,' 'to cast,' 'to eat,' 'to wish,' 'to shine.' It has the same meaning as the root वी 'to go.' (II 39) It is conjugated like दीधी ।

Pre. वेवीते । Per. वेव्यांचक्रे । I Fut. वेवीता । II Fut. वेविष्यते । (S. 2488) Imperative वेवीताम् । Imper. अवेवीत । Poten. वेवीत । Bene. वेविषीष्ट । Aorist अवेविष्ट । Condi. अवेविष्यत । Pass. वेवीयते । Caus. वेवयते । Deside. वेवेवीषते । Inten. वेवेवीयते । Pre. Atmane. Par. वेवयानः । Past. Part. Pass. वेवीतः Act. वेवीतवान् । Fut. Part. वेविष्यमाणः Gerund वेवीत्वा । Infini. वेवीतुम् । Adject. वेवीतव्यं । वेव्यनीयं । वेवेयम् ।

Here end the roots beginning with अद ।

अथ त्रयः परस्मैपदिनः । 'षस ६९ षस्ति ७० स्वप्ने' । सस्ति । सस्तः । ससन्ति । ससास । सेसतुः । सस्तु । सधि । 'पूर्वत्रासिद्धम्' (सू १२) इति सलोपस्यासिद्धत्वात् 'अतो हेः' (सू २२०२) इति न लुक् । असत् । असस्ताम् । असुः । असत् । सस्यात् । असासीत्–अससीत् । सन्ति । इदित्वान्नुमि कृते संस्त्' इति स्थिते 'स्कोः–' (सू ३८०) इति सलोपे 'झरो झरि सवर्णे' (सू ७१) इति तकारस्य

वा लोपः । सन्तः । संस्तन्ति । बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य 'स्कोः-' (सू ३८०) इति लोपाभावात् । संस्ति । संस्तः । संस्तन्ति इत्येके ।

षस ६९ षस्ति क स्वप्ने ।

69 √ shas 69 (a) √ shasti 'to sleep'. The roots सस्, संस्त, वश and the Intensives without यङ् are all Parasmaipadis. Some say that षस् and षस्ति are not two different roots : and that षस्ति is the root षस exhibited with श्तिप् in order to show difference of meaning. Swâmî gives only one root षस् षसने । षसन means sleep. The second root is सन्स्त् the इ in षस्ति is indicatory.

Pre. सस्ति । सस्तः । ससन्ति । सस्सि । सस्मि । Per. ससास । सेसतुः । सेसुः । सेसिथ । सेस । ससास or ससस । सेसिव । I Fut. ससिता । II Fut. ससिष्यति । Imperative सस्तु । सधि । (सस्+हि = स+हि (VIII. 2. 25. S. 2249). Now अतो हेः S. 2202 required the elision of हि as it follows after a root ending in अ । But it is not so, because the elision of स is by a Tripâdi rule and therefore asiddha before 7¼ Pâdî rules. S. 12.) ससानि । Imper. असत् । असस्ताम् । अससः । असत् । Poten. सस्यात् । सस्याताम् । Bene. सस्यात् । Aorist असासीत् । or अससीत् । Cond. अससिष्यत् । Pass. सस्यते । Caus. सासयति । Aorist असीससत् । Deside. सिससिषति । Inten. सासस्यते । yaṅ luk सासस्ति ।

Nouns:—सस्यकः । सस्यं । सास्ना । Pre. Part. Parasmai ससन् । Past Part. Pass. ससितं Act. ससितवान् Fut. Part. ससिष्यमाणः Gerund ससित्वा Infini. ससितुं Adject. ससितव्यं ससनीयं सस्यम् ।

60 (a) √ shasti. The इ is indicatory, and causes the addition of the nasal. The root is thus सन्स्त् The Present 3rd Singular is सन्स्त् + ति । (Sanst + ti). The स् is elided by VIII. 2. 29. S. 380: and we have सन्त्+ति । Then the त् is elided by VIII. 4. 65 S. 71. We have then सन् + ति=सन्ति । According to Átreya and Maitreya, the स is not elided, and they give the forms संस्ति, D. संस्तः, P. संस्तन्ति । They say that in सन्स्त् the conjunct or the saṅyoga consonants are न्स्त्, and therefore the designation of saṅyoga cannot be given to स्त् alone, and so the rule VIII. 2. 29 S. 380 does not apply as in सन्स्त् the स is not the initial of a conjunct consonant. Where there is conjunction of many consonants, the conjunction of two of them is not called saṅyoga, the definition cannot be split up.

Pre. सन्ति । सन्तः । संस्तन्ति ।

'वश ७१ कान्तौ' । कान्तिरिच्छा । वष्टि । उष्टः । उशन्ति । वक्षि । उष्ठः । उवाश । ऊशतुः । वशिता । वष्टु । उष्टात् । उड्ढि । अवट् । औष्टाम् । औशन् । अवशम् । उश्याताम् । उश्यास्ताम् ।

७० वश कान्तौ

70 √ vasâ 'to wish, desire, long for.' कान्ति here means desire.

Pre. वष्टि । उष्टः । उशन्ति । वक्षि । उष्ठः । (VI. 1. 16. S. 2412). वश्मि । उश्वः । Per. उवाश । ऊशतुः । उवशिथ । उवशिव । I Fut. वशिता । II Fut. वशिष्यति । Imperative वष्टु or उष्टात् । उष्टाम् । उड्ढि । वशानि । Imper. अवट् । औष्टाम् । औशन् । अवट् । औष्टम् ।

औष्ट । अवशम् । औश्व । Poten. उश्यात् । उश्याताम् । Bene. उश्यात् । उश्यास्ताम् । Aorist अवाशीत् । or अवशीत् । Condi. अवशिष्यत् Pass. उश्यत । Caus. वाशयति । Aorist अवीवशत् । Deside. विवशिषति । Inten. वावश्यते । (VI. 1. 20. S. 2646). yaṅ luk वावष्टि । D. वावष्टः । Nouns:—वशा । गोवशा । वशः । औशिजः । उशीरम् । उशना । Pre. Part. Parasmai. वशन् । Past Part. Pass. वशितः । Act. वशितवान् Fut. Part. वशिष्यमाणः । Gerund वशित्वा । Infini. वशितुम् । Adj. वशितव्यं वशनीयं वश्यम् ।

'चर्करीतं च' (ग सू) । यङ्लुगन्तमदादौ बोध्यम् ।

चर्करीतं च । ७१ ।

यङ् लुगन्तमदादौ बोध्यम् ।

71. And Charkarîta verbs.

This is a Gaṇa sûtra. The word charkarîta is the name given to the Intensive verbs where the यङ् is elided. All yaṅ luk Intensive roots are to be conjugated as Adâdi roots. In fact, they belong to this class. As almost all roots can give birth to yaṅ luk roots, as derivative dhâtus, the scope of the Adâdi class is immensely increased. We have given the illustrations of yaṅ luk under each root already, and so no especial illustrations are given here. The method of the formation of yaṅ luk will be taught in a future chapter.

'ह्नुङ् ७२ अपनयने' । ह्नुते । जुह्नुवे । ह्नुवीत । ह्नोषीष्ट । अह्नोष्ट ।

ह्नुङ् ७२ अपनयने

72✓ hnuṅ 'to take away, rob, abstract.

Pre. निह्नुते । निह्नुवाते । निह्नुवते । निह्नुषे । निह्नुवे । Per. निजुह्नुवे । निजुह्नुवाते । निजुह्नुविषे । निजुह्नुविध्वे or ढ्वे । I Fut. नि + ह्नोता । II Fut. नि + ह्नोष्यते । Imperative निह्नुताम् । निह्नुष्व । निह्नवै । Imper. नि+अह्नुत । न्यह्नुवाताम् । न्यह्नुथाः । न्यह्नुवि । न्यह्नुवहि । Poten. निह्नुवीत । निह्नुवीयाताम् । Bene. निह्नोषीष्ट । Aorist नि + अह्नोष्ट । न्यह्नोष्ठाः । न्यह्नोध्वम् । न्यह्नोषि । Condi. अह्नोष्यत । Pass. ह्नुयते । Caus. निह्नावयति । Aorist न्यजुह्नवत् । Deside. निजुह्नूषते । Inten. निजोह्नुयत । yaṅ luk निजोह्नवीति । or निजोह्नोति । Pre. Part. Parasmai. Atmane. ह्नुवान । Past. Part. Pass. ह्नुयते । Act. ह्नुतवान् । Fut. Part. ह्नोष्यमाणः । Gerund ह्नुत्वा । Infini. ह्नोतुम् । Adject. ह्नोतव्यं । ह्नवनीयं । ह्नव्यम् ।

इति तिङन्तादादिप्रकरणम् ।

Here end the Adâdi roots.

CHAPTER III.

अथ तिङन्तजुहोत्यादिप्रकरणम् ।

THE JUHOTYADI VERBS.

This class of verbs begins with the root हु which by reduplication becomes juhu. The class gets its name from the first root.

हु १ दानादनयोः ।

'आदाने च' इत्येके । 'प्रीणनेपि' इति भाष्यम् । दानं चेह प्रक्षेपः । स च वैधे आधारे हविश्चेति स्वभावाल्लभ्यते । इतश्चत्वारः परस्मैपदिनः ॥

1. √hu. To give, to eat. Some read it as âdâne "to accept." In the Mahabhâshya the additional sense of 'to satisfy' is also given to this root. The दान or giving here refers to the giving or throwing (of oblation into fire). The throwing therefore, naturally means the throwing in a proper receptacle (like fire &c.) and of the proper thing (as oblation &c).

The first four roots are Parasmaipadi. Thus हु+शप्+तिप् । Now applies the following :—

२४८९ । जुहोत्यादिभ्यः श्लुः । २ । ४ । ७५ ॥

शपः श्लुः स्यात् ॥

2489. After the verbs हु 'to sacrifice' and others, there is ślu-elision of the Vikaraṇa शप् (III. 1. 68).

Thus हु+o+तिप् । Now applies the following :—

२४९० । श्लौ । ६ । १ । १० ॥

धातोर्द्वे स्तः । जुहोति । जुहुतः । 'अदभ्यस्तात्' (२४७६) इत्यत् । 'हुश्नुवोः–' (२३८७) इति यण् । जुह्वति ॥

2490. Of a non-reduplicate root there is reduplication when the vikaraṇa is elided by ślu (श्लु) ।

NOTE :—The श्लु is the characteristic sign of the roots of the third class, and causes the elision of the vikaraṇa शप् । The reduplication is of the first or second syllable, according as the root has an initial consonant or a vowel. Thus जुहोति (from हु), बिभेति, जिहेति ॥

Thus हु+o+तिप्=जुहोति । The dual is जुहुतः । The Plural is जुहु+झि=जुहु+अति (VII. 1. 4. s. 2479)=जुह्व+अति (VI. 4. 87. s. 2387, व् instead of उवङ्)=जुह्वति ॥

In forming the Perfect, we have optionally the Periphrastic form, with आम् added to the reduplicated stem by the following :—

२४९१ । भीह्रीभृहुवां श्लुवच्च । ३ । १ । ३९ ।

एभ्यो लिट्याम्वा स्यादामि श्लाविव कार्यं च । जुहवांचकार । जुहाव । होता । होष्यति । जुहोतु । जुहुतात् । हेर्धिः । जुहुधि । आटि परत्वाद्गुणः । जुहवानि । परत्वात् 'जुसि च' (२४८१) इति गुणः । अजुहवुः । जुहुयात् । हूयात् । अहौषीत् ॥

2491. **आम्** is optionally affixed, when **लिट्** follows, after the verbs **भी** 'to fear,' **ह्री** 'to be ashamed,' **भृ** 'to nourish,' **हु** 'to sacrifice;' and when **आम्** is affixed, the effect is as if there were **श्लु** elision and the roots belonged to Hvâdi class.

NOTE :—The effect of श्लु is to cause reduplication by rule VI. 1. 10. As बिभयाञ्चकार or बिभाय, जिह्रयाञ्चकार or जिह्राय, बिभराञ्चकार or बभार, जुहवाञ्चकार or जुहाव ॥

Thus जुहवांचकार or जुहाव । The First Fut. is होता । The second Future is होष्यति । The Imperative 3rd Sg. is जुहोतु or जुहुतात् । 2nd S. is जुहुधि, the हि is replaced by धि by VI. 4. 101. s. 2425. The 1st Sing. is जुहवानि by आट् (III. 4. 92. s. 2204) ; and as आट् is पित् by the above sûtra, it causes guṇa.

In the Imperfect 3rd Plu. we have अजुहवुः with जुस् । The जुस् causes guṇa under VII. 3. 83. s. 2481; and it debars the semi vowel substitution required by VI. 4. 87. s. 2387, because the guṇa (VII. 3. 83) is taught subsequent in Ashṭâdhyâyi order than the यणादेशः (VI. 4. 87).

	Singular.	*Dual.*	*Plural.*
Third Person.	जुहवांचकार	जुहवांचक्रतुः	जुहवांचक्रुः
Second Person.	जुहवांचकर्थ	जुहवांचक्रथुः	जुहवांचक्र
First Person.	जुहवांचकार	जुहवांचकृव	जुहवांचकृम
	or		
Third Person.	जुहाव	जुहुवतुः	जुहुवुः
Second Person.	जुहुविथ or जुहोथ	जुहुवथुः	जुहुव
First Person.	जुहाव	जुहुविव	जुहुविम
	लोट्		
Third Person.	जुहोतु	जुहुताम्	जुह्वतु
Second Person.	जुहुधि	जुहुतम	जुहुत
First Person.	जुहवानि	जुहवा	जुहवाम्
	लुङ्		
Third Person.	अहौषीत्	अहौष्टाम्	अहौषुः
Second Person.	अहौषीः	अहौष्टम्	अहौष्ट
First Person.	अहौषम्	अहौष्व	अहौष्म

1. √hu. to offer or present (as an oblation to fire).

Pre. जुहोति। जुहुतः। जुह्वति। जुहोषि। जुहुथः। जुहुथ। जुहोमि। जुहुवः। जुहुमः। Per. जुहवांचकार or जुहाव। जुहुवतुः। जुहुवुः। जुहोथ or जुहविथ। जुहुवथुः। जुहुव। जुहाव, जुहव। जुहुविव। जुहुविम। I Fut. होता। II Fut. होष्यति। Impera. जुहोतु। जुहुताम्। जुह्वतु। जुहुधि। जुहुतम्। जहुत। जुहवानि। जुहवाव। जुहवाम। Imper. अजुहोत। अजुहुताम्। अजुहवुः। अजुहोः। अजुहुतम्। अजुहवम्। Poten. जुहुयात्। जुहुयाताम्। जुहुयुः। Bene. हूयात्। हूयास्ताम्। The lengthening is by VII. 4. 25. s. 2298. Aorist. अहौषीत्। अहौष्टाम्। अहौषुः। अहौषीः। अहौष्टम्। अहौष्ट। अहौषम्। अहौष्व। अहौष्म। Condi. अहोष्यत्। Pass. हूयते। Caus. हावयति। अजूहवत्। Desid. जुहूषति। Intensive जोहूयते। जोहोति। जुहवति। Nouns. होमः। हविः। होत्रम्। हव्यम्। जौहुतः। जौह्वतः। होता। होतारौ। वीर होता। जुहूः। होत्रा॥

ञिभी २ भये। बिभेति॥

2.√ñibhî. to fear.

The Present is **बिभेति**। In the dual, there are double forms owing to the following sûtra.

२४९२। भियोऽन्यतरस्याम्। ६। ४। ११५।

इकारः स्याद्धलादौ क्ङिति सार्वधातुके। बिभितः-बिभीतः। बिभ्यति। बिभयांचकार। बिभाय। भेता॥

2492. इ is optionally substituted for the ई of भी before a Sârvadhâtuka affix beginning with a consonant and having an indictory क् or ङ्॥

Thus बिभितः or बिभीतः, बिभिथः or बिभीथः, बिभिवः or बिभीवः; बिभिमः or बिभीमः। But बिभ्यति before a vowel-beginning affix and बिभेति before a non ङित् affix and भीयते before an ârdhadhâtuka affix.

2.√ñibhî. to fear, to be afraid.

Pre. बिभेति। बिभितः, बिभीतः। बिभ्यति। बिभेषि। बिभीथः, बिभिथः। बिभीथ, बिभिथ। बिभेमि। बिभिवः, बिभीवः। बिभिमः, बिभीमः। Pre. बिभयांचकार or बिभाय। बिभ्यतुः। बिभ्युः। बिभयिथ or बिभेथ। बिभ्यथुः। बिभ्य। बिभाय। बिभ्यिव। बिभ्यिम। I Fut. भेता। II Fut. भेष्यति। Impera. बिभेतु, बिभीतात्। बिभीताम्। बिभ्यतु। बिभिहि, बिभीतात्, बिभीहि। बिभीतम्। बिभयानि। Imper. अबिभेत्। अबिभीताम्। अबिभयुः। अबिभेः। अबिभीतम् or अबिभितम्। अबिभयम्। अबिभिव, अबिभीव। Pot. बिभीयात्। बिभियाताम्. बिभीयाताम्। बिभीयाः, बिभियाः। बिभीयां। Bene. भीयात्। भीयास्ताम्। Aorist. अभैषीत्। अभैष्टाम्। अभैषीः। अभैषम्। Cond. अभेष्यत्। Pass. भीयते। Caus. भापयते। (VI 1.56. s. 2593) भीषयते। (VII. 3. 40. s. 2595) भाययति। Aor. अबीभयत। अबीभयत। अबीभषत। Desi. बिभीषति। Intensive. बेभीयते। yanluk बेभेति। बेभीतः बिभितः॥ Nouns:-भीति। भयम्। भीः। भियौ। भीरुः। भीमः। भयानकः। भीलुकः। भीष्मः। भेकः। भीरुकः॥

ह्री ३ लज्जायाम्। जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयाञ्चकार-जिह्राय॥

3. √hrî. to be ashamed.

Pre. जिह्रेति। जिह्रीतः। जिह्रियति। Per. जिह्रियाचकार or जिह्राय। I Fut. ह्रेता। II Fut. ह्रेष्यति। Impera. जिह्रेतु। Imper. अजिह्रेत्। Poten. जिह्रियात्। Bene. ह्रीयात्। Aorist. अह्रैषीत्। Condi. अह्रेष्यत्। Pass. ह्रीयते। Caus. ह्रेपयति। Aor. अजिह्रियत्। Desi. जिह्रीषति। Inten. जेह्रीयते। Past Parti. Pass. ह्रीतः। ह्रीणः। Act. ह्रीतवान्। ह्रीणवान्॥ Nouns. ह्रीकः। ह्लीकः। ह्रीः॥

पॄ ४ पालनपूरणयोः॥

4. √pṛî. 1. to nourish : 2. to fill.

Thus पॄ+ति=पॄ पॄ+ति। Now applies the following sûtra by which इर् is substituted for the ॠ of the reduplicate;—

२४९३। अर्तिपिपर्त्योश्च। ७।४।७७॥

अभ्यासस्येकारोऽन्तादेशः स्याच्छ्लौ॥

2493. इ is substituted for the vowel of the reduplicate of ऋ and पॄ in the reduplicated Present-form.

NOTE :—As इयर्ति (VI. 4. 78) धूमम्, पिपर्ति सोमम्॥

Thus पिपॄ+ति। Now the following sûtra requires that the ॠ of पॄ should be changed to उर्॥

२४९४। उदोष्ठ्यपूर्वस्य। ७।१।१०२॥

अङ्गावयवौष्ठ्यपूर्वो य ॠत्तदन्तस्याङ्गस्य उत्स्यात्। गुणवृद्धी परत्वादिमं बाधेते। पिपर्ति। उत्वम्। रपरत्वम्। 'हलि च' (३५४) इति दीर्घः। पिपूर्तः। पिपुरति। पपार। क्ङिति लिटि 'ऋच्छत्यॄताम्' (२३८३) इति गुणे प्राप्ते॥

2494. उर् is substituted for the final long ॠ of a root, when it is preceded by a labial consonant belonging to the root-stem.

NOTE :—As पूर्त and पुपूर्षति from पॄ, so also मुमूर्षति॥ The lengthening is by VIII. 2. 77. The rule applies when the dento-labial व precedes : as वुवूर्षति ऋत्विजम् from वॄ so also प्रावुवूर्षति कम्बलम्। The labial consonant must be the consonant of the root. Therefore when ॠ 'to go' is preceeded by सम्, the rule will not apply, for म् is not part of the root : as समीर्णम् by VII. 1. 100.

NOTE :—*Vârt* ;—The Guṇa and Vṛiddhi do take place in supersession of इर् and उर substitution. Thus आस्तरणम् and आस्तारकः (from स्तॄ with ल्युट् and ण्वुल्), निपरणम्, निपारकः from पॄ, निगरणम्, निगारकः from गॄ॥

Thus पिपॄ+ति ought to be पिपुर्+ति। But the rules of Guṇa and Vṛiddhi being subsequent in the Ashṭâdhyâyî order, supersede this rule.

Thus we get by guṇa पिपर्ति । But in the dual, there will be उ of this sûtra, which must be followed by र् (I. 1. 51. s. 70), and is then lengthened by VIII. 2. 77. s. 354. Thus पिपॄ+तः=पिपु+तः (VII. 1. 102. s. 2494)=पिपुर्+तः (I. 1. 51. s. 70)=पिपूर्तः (VIII. 2. 77. s. 354). The Plural is पिपुरति ॥

The Perfect is पपार । In the dual we have पपॄ+अतुस् । Now VII. 4. 11. s. 2383 requires guṇa of ॠ । But the following sûtra allows an option.

२४९५ । शॄदॄप्रां ह्रस्वो वा । ७ । ४ । १२ ॥

एषां किति लिटि ह्रस्वो वा स्यात् । पक्षे गुणः । पप्रतुः । पप्रुः । पपरतुः । पपरुः । परिता-परीता । अपिपः । अपिपूर्ताम् । अपिपरुः । पिपूर्यात् । पूर्यात् । अपारीत् । अपारिष्टाम् । 'ह्रस्वान्तोऽयम्' इति केचित् । पिपर्ति । पिपृतः । पिप्रति । पिपृयात् । आशिषि । प्रियात् । अपार्षीत् । पाणिनीयमते तु 'तं रोदसी पिपृतम्' इत्यादौ छान्दसत्वं शरणम् ॥

2495. In शॄ, 'to injure' दॄ 'to tear' and पॄ to protect' the vowel may optionally be shortened in the Perfect.

Pre. माद्यति Aor. अमदत् । Causa. मदयति or मादयति । Nouns:—मदनः उन्मादी । मदः । प्रमदः । सम्मदः । उन्मदिष्णुः । मदिरा । इरम्मदः । मद्यम् । Gerund मदित्वा । Part. मत्तः । मत्तवान् ।

Here end the eight roots of the Śamâdi class.

असु १०० क्षेपणे ।

अस्यति । आस । असिता ।

100. √asu, to throw. Pres. अस्यति । Per. आस । First Future असिता । In forming the Aorist थ is inserted by the following sûtra :—

२५२० । अस्यतेस्थुक् । ७ । ४ । १७ ।

अङि परे । आस्थत् । अस्य पुषादित्वादङि सिद्धे 'अस्यतिवक्ति–' (सू २४३८) इति वचनं तङर्थम् । तङ् तु 'उपसर्गादस्यत्यूह्योः' इति वक्ष्यते । पर्यास्थत ।

2520. The root अस् (अस्यते) gets the augment थुक् before this Aorist. formed by अङ् ॥

As आस्थत्, आस्थताम्, आस्थन् ॥ See III. 1. 52. S. 2438.

This root takes अङ् by III. 1. 55 S. 2343, because it belongs to the पुषादि class. Why is then अङ् enjoined specifically after it by the sûtra III. 1. 52 S. 2438? That sûtra ordains अङ् in the Atmanepada, while the Pushâdi an̂ comes in the Parasmaipada only. The √as is conjugated in the Atmanepada when it takes particular prepositions, such as परि &c as will be taught in the vârtika under sûtra VII. 1. 7. S. 2701. As पर्यास्थत ।

100. √asu, to throw.

Per. अस्यति । Per. आस । आसिथ । I Fut. असिता । II Fut. असिष्यति । Impera. अस्यतु । Imper. अस्यत् Poten. अस्येत् । Bene. अस्यात् । Aor. अस्थात् । आस्थताम् । Causa. आसयति । Aor. आसिसत् । Desid. असिसिषति । Past. Pass. अस्तः । Act.

अस्तवान् । Ger. असित्वा or अस्त्वा । Nouns :—असुरः । स्वसा । समस्या । संन्यस्यम् । प्रासनम् । असुः ।

100. √as preceded by any prefix is conjugated in the Atmanepadi.

Pre. निरस्यते । Per. निरासे । निरासिषे I Fut. निरासिता । II Fut. निरसिष्यते। Impera. निरस्यताम् । Imper. निरास्यत । Poten. निरस्येत । Bene. निरसिषीष्ट Aor. निरास्थत । निरास्थेताम् । Pass. निरस्यते । Aor. निरासि d. निरासिषाताम् । Desid निरसिसिषते or ति ।

यसु १०१ प्रयत्ने ।

101. √yasu, to strive, endeavour, labor. This root optionally takes श्यन् by the following two sûtras :—

२५२१ । यसोऽनुपसर्गात् । ३ । १ । ७१ ।

2521. The affix श्यन् is optionally added after the verb यस् 'to strive', when it is employed, without a preposition, and when a sârvadhâtuka affix denoting an agent, follows.

Thus यस्यति or यसति 'he strives'. But no option is allowed in आयस्यति, प्रयस्यति. This option is allowed even when the preposition is सम् by the following sûtra :—

२५२२ । संयसश्च । ३ । १ । ७२ ।

श्यन्वा स्यात् । यस्यति–यसति । संयस्यति–संयसति । 'अनुपसर्गात्' किम् । प्रयस्यति ।

2522. The affix श्यन् is optionally employed after the root यस् 'to strive', when it is preceded by the preposition सम्, and when a sârvadhâtuka affix denoting an agent, follows.

Thus संयस्यति or संयसति 'he strives'.

101. √yasu, to strive, endeavour, labor.

Pre. यस्यति or यसति । Per. ययास । येसतुः । I Fut. यसिता । II Fut. यसिष्यति । Impera. यस्यतु or यसतु । Impera. अयस्यत् or अयसत् । Poten. यस्येत् or यसेत् । Bene. यस्यात् । Aor. अयसत् । Condi. अयसिष्यत् । Causa. यसयति Desid. यियसिषति । Inten. यायस्यते । yaṅluk यायस्ति । Past Pass. यस्तः । Act. यस्तवान् Ger. यसित्वा or यस्त्वा ।

जसु १०२ मोक्षणे ।

जस्यति ।

102. √jasu, to set free, release. This root is in the Churâdi also.

Pre. जस्यति । Per. जजास I Fut. जसिता II Fut. जसिष्यति Imper. जस्यतु Imper. अजस्यत् Poten. जस्येत् Bene. जस्यात् Aor. अजसत् Noun : अजस्रम् ।

तसु १०३ उपक्षये ।

तस्यति । अतसत् ।

103. √tasu, to fade away, become exhausted ; to throw or toss.

Pre. तस्यति । Per. ततास । I Fut. तसिता । II Fut. तसिष्यति । Impera. तस्यतु । Imper. अतस्यत् । Poten. तस्येत् । Bene. तस्यात् । Aor. अतसत् । Condi. अतसिष्यत्

दसु १०४ च ।

दस्यति । अदसत् ।

104. √dasu cha, to throw, toss, decay. In the sense of 'to give,' it is Bhvâdi.

Pre. दस्यति । Per. ददास । I Fut. दसिता । II Fut. दसिष्यति । Impera. दस्यतु। Imper. अदस्यत् । Poten. दस्येत् । Bene. दस्यात् । Aor. अदसत्। Condi. अदसिष्यत् । Nouns :—दस्त्री । Past. दसितः or दस्तः

वसु १०५ स्तम्भे ।

वस्यति । ववास । ववसतुः । 'न शसदद–' (सू २२६३) इति निषेधः । बसादिरयमिति मते तु । बेसतुः । बेसुः ।

105. √vasu to fix. In the Perfect there is no एत्व nor the elision of the reduplicate, because VI. 4. 126, S. 2263 applies. According to others the root is बसु with 'b.' In that view the Perfect will be बेसतुः, बेसुः ।

Pre. वस्यति । Per. ववास । ववसतुः । I Fut. वसिता ।

व्युष १०६ विभागे ।

अयं दाहे पठितः । अर्थभेदेन स्वङर्थं पुनः पठ्यते । अव्युषत् । ओष्ठ्यादिर्दन्त्यान्त्योऽयम् । 'ब्युसति' इत्यन्ये । अयकारं 'बुस' इत्यपरे ।

106. √vyuṣh to divide. This has already been taught before with the sense of 'to burn'. It is repeated here again, because a new meaning is given to it; and to conjugate it in the aorist with अङ् as अव्युषत्. Some read this root as 'byus', beginning with ब 'b', and ending with स 's'. As ब्युस्यति ।

The others read the root without य, as बुस, √vusa.

Pre. व्युष्यति or ब्युस्यति or बुस्यति । Aor. अव्युषत् or अब्युसत् ।

प्लुष १०७ दाहे ।

अप्लुषत् । पूर्वत्रपाठः सिजर्थ इत्याहुः । तद्भ्वादिपाठेन गतार्थमिति सुवचम् ।

107. √pluṣha, to burn. The aorist will be with अङ्, as अप्लुषए । It has been taught before also. There the aorist is with सिच् । Thus say some Acharyaṣ. The better would be to say that it is included in the Bhuâdi class and so the aorist will be with सिच् ।

Pre. प्लुष्यति । Per. पुप्लोष । I Fut. प्लोषिता । Aor. अप्लुषत् ।

बिस १०८ प्रेरणे ।

बिस्यति । अबिसत् ।

108. √bisa, to incite, drive or urge on, instigate.

Pre. बिस्यति । Per. बिबेस। I Fut. बेसिता Aor. अबिसत् । Nouns : । बिसम् । बिस्तः द्विबिस्त । द्वैबिस्तकी ।

कुस १०९ संश्लेषणे ।

अकुसत् ।

109. √kusa to embrace, surround.

Pre. कुस्यति । Per. चुकोस । I Fut. कोसिता । Aor. अकुसत् । Noun: कुसितायी

बुस ११० उत्सर्गे ।

110. √busa, to discharge, emit, pour forth; divide.

Pre. बुस्यति । Per. बुबोस । I Fut. बोसिता । Impera. बुस्यतु । Imper. अबुस्यत् । Poten. बुस्येत् । Bene. बुस्यात् । Aor. अबुसत् । Nouns: बुसम् । खलेबुसम् । बुस्तम् ।

मुस १११ खण्डने ।

111. √musa, to cleave, divide.

Pre. मुस्यति । Per. मुमोस । I Fut. मोसिता । II Fut. मोसिष्यति Impera. मुस्यतु । Imper. अमुस्यत् । Poten. मुस्येत् । Bene. मुस्यात् । Aor. अमुसत् । Nouns : मुसलम् । मुसल्यः । मुस्ता । मुस्तकम् ।

मसी ११२ परिणामे ।

परिणामो विकारः । 'समी' इत्येके ।

112. √masî, to weigh, measure, to change form. Some read it as समी √samî.

Pre. मस्यति । Per. ममास । मेसतुः । I Fut. मसिता । II Fut. मसिष्यति । Impera. मस्यतु । Imper. अमस्यत् । Poten. मस्येत् । Bene. मस्यात् । Aor. अमसत् । Condi. अमसिष्यत् । Causa. मासयति । Aor. अमीमसत् । Desid. मिमसिषति । Inten. मामस्यते । yañluk मामस्ति Past. Pass. मस्तः । Act मस्तवान् । Nouns :—मस्तकम् । मस्तु

लुट ११३ विलोडने ।

113. √luṭa, to roll or wallow on the ground. The Bhuâdi root forms its aorist as अलोटीत् with सिच् । It is in the Dyutâdi list also, and so the aorist is with अङ् also. As अलुटत् । A अलोटिष्ट ।

Pre. लुट्यति । Per. लुलोट । I Fut. लोटिता । II Fut. लोटिष्यति । Impera. लुट्यतु . Imper. अलुट्यत् । Poten. लुट्येत् । Bene. लुट्यात् । Aor. अलुटत् । Condi. अलोटिष्यत् ।

उच ११४ समवाये ।

उच्यति । उवोच । ऊचतुः । मा भवानुचत् ।

114. √ucha, to be suitable, suit, fit.

Pre. उच्यति । Per. उवोच । ऊचतुः । उवोचिथ । I Fut. ओचिता । II Fut. ओचिष्यति । Impera. उच्यतु । Imper. औच्यत् । Poten. उच्येत् । Bened. उच्यात् । Aor. औचीत् (The real form without the augment अ is उचत् as in मा भवानुचत् !). Condi. ओचिष्यत् Desid. ओचिचिषति । Past. Pass. उचितः । Ger. ओचित्वा । Nouns :—औचित्यम् । ओकः । ओकसी । उल्बम् । औचिती ।

भृशु ११५ भ्रंशु ११५ (क) । अधः पतने ।

बभर्श । अभृशत् । 'अनिदिताम्–' (४१५) इति नलोपः । भ्रश्यति । अभ्रशत् ।

115. √bhṛiśu, √bhranśu, to fall down. As बभर्श । Aor. अभृशत् । From भ्रंशु we have भ्रश्यति and Aor. अभ्रशत् । The násal is elided by. S. 415.

Pre. भृश्यति । Per. बभर्श । बभृशतुः । बभृशुः । बभर्शिथ । बभृश । बभृशिव । I Fut. भर्शिता । II Fut. भर्शिष्यति । Impera. भृश्यतु । Imper. अभृश्यत् । Poten. भृश्येत् ।

Bene. भृश्यात् । Aor. अभृशत् Condi. अभर्शिष्यत् । Causa. भर्शयति Aor. अबीभृशत् । अबभर्शत् । Desider. बिभर्शिषति । Inten. बरीभृश्यते । yaṅ luk बरीभर्ष्टि । Past. Pass. भृष्टः । Act. भृष्टवान् । Ger. भर्शित्वा भृष्ट्वा । Nouns :—भृशम् । भार्श्यंत् । भ्रशिमा । भ्रशीयान् ।

115 A. √bhra*m*śu.

Pre. भ्रश्यति Pre. बभ्रंश बभ्रंशतुः । बभ्रंशिथ । बभ्रंशिव I Fut. भ्रंशिता । II Fut. भ्रशिष्यति । Impera. भ्रश्यतु । Imper. अभ्रश्यत् । Poten. भ्रश्येत् । Bene. भ्रश्यात् । Aor. अभ्रशत् । Causa. भ्रशयति । Desid. बिभ्रंशिषति । Inten. बाभ्रश्यते । yaṅ luk बाभ्रष्टि । Past. Ger. भ्रशित्वा । or भ्रष्ट्वा ।

वृश ११६ वरणे :

वृश्यति । अवृशत् ।

116. √vriś to choose, select.

Pre. वृश्यति । Per. ववर्श । I Fut. वर्शिता । II Fut. वर्शिष्यति । Impera. वृश्यतु । Imper. अवृश्यत् । Poten. वृश्येत् । Bene. वृश्यात् । Aor. अवृशत् । Nouns वृशिष्ठः (VI. 4. 161 S. 1785). वृशीयान् ।

कृश ११७ तनूकरणे ।

कृश्यति ।

117. √kṛiśa, to become lean or emaciated; to wane.

Pre. कृश्यति । Per. चकर्श । I Fut. कर्शिता । II Fut. कर्शिष्यति । Impera. कृश्यतु । Imper. अकृश्यत् । Poten. कृश्येत् । Bene. कृश्यात् । Aor. अकृशत् । Condi. अकर्शिष्यत् । Causa. कर्शयति । Ger. कर्शित्वा । or कृशित्वा । Nouns: कृशः । क्रशिष्ठः । क्रशीयान् । प्रकृशितः । परिकृशितः । क्रशिमा । कृशानुः ।

ञितृष ११८ पिपासायाम् ।

118. √ñitṛiṣha to be thirsty.

Pre. तृष्यति । Per. ततर्ष । I Fut. तर्षिता । II Fut. तर्षिष्यति । Impera. तृष्यतु । Imper. अतृष्यत् । Poten. तृष्येत् । Bene. तृष्यात् । Aor. अतृषत् । Condi. अतर्षिष्यत् । Past. तृषितः । Ger. तृषित्वा or तर्षित्वा । Nouns: तृष्णक् । तृष्णा । तृट् । ह्रदवर्षस् । ह्रदंवर्षस् ।

हृष ११९ तुष्टौ ।

श्यन्नङौ भौवादिकाद्विशेषः ।

119. √hṛiṣha, to be delighted, pleased. It is differentiated from the Bhuadi हृष by taking श्यन् and forming the aorist with अङ् !

Pre. हृष्यति । Per. जहर्ष । I Fut. हर्षिता । II Fut. हर्षिष्यति । Impera. हृष्यतु । Imper. अहृष्यत् । Poten. हृष्येत् । Bene. हृष्यात् । Aor. अहृषत् । Condi. अहर्षिष्यत् ।

रुष १२० रिष १२० (क) हिंसायाम् ।

'तीषसह–' (२३४०) इति वेट् । रोषिता–रोष्टा । रेषिता–रेष्टा ।

120. √ruṣha, √riṣha, to be angry; to injure. It optionally takes इट् under S. 2340. A रोषिता or रोष्टा, रेषिता or रेष्टा ।

Pre. रुष्यति । Per. रुरोष । रुरोषिथ । रुरुषिव । I Fut. रोषिता । or रोष्टा । II Fut. रोषिष्यति । Impera. रुष्यतु । Imper. अरुष्यत् । Poten. रुष्येत् । Bene. रुष्यात् Aor.

अरुषत् । Condi. अरोषिष्यत् । Desi. रुरुषिषति । रुरोषिषति । Ger. रोषित्वा or रुष्ट्वा or रुषित्वा ।Part. रोषितः or रुष्टः ।

डिप १२१ क्षेपे ;

121. √ḍipa, to throw. It is found in the Tudâdi and Churâd classes also.

Pre. डिप्यति । Per. डिडेप । डिडेपिथ । डिडिपिव । I Fut. डेपिता । II Fut. डेपिष्यति । Impera. डिप्यतु । Imper. अडिप्यत् । Poten. डिप्येत् । Bene. डिप्यात् । Aor. अडिपत् । Condi. अडेपिष्यत् । Pass. डिप्यते Causa. डेपयति Aor. अडीडिपत् । Desi. डिडिपिषति । डिडेपिषति । Inten. डेडिप्यते । yaṅ luk डेडेप्ति । Ger. डिपित्वा

कुप १२२ क्रोधे ।

122. √kupa to be angry.

Pre. कुप्यति । Per. चुकोप । I Fut. कोपिता । II Fut. कोपिष्यति । Impera. कुप्यतु । Imper. अकुप्यत् । Poten. कुप्येत् । Bene. कुप्यात् । Aor. अकुपत् । Condi. अकोपिष्यत् । Noun कुमस् ‘ a forest’.

गुप १२३ व्याकुलत्वे ।

123. √gupa, to be confused or disturbed.

Pre. गुप्यति । Per. जुगोप । I Fut. गोपिता । II Fut. गोपिष्यति । Impera. गुप्यतु । Imper. अगुप्यत् । Poten. गुप्येत् । Bene. गुप्यात् । Compare गोपायति and. जुगुप्सते of Bhvâdi, and गोपयति of Churâdi class.

युपु १२४ रुपु १२५ लुपु १२६ विमोहने ।

युप्यति । रुप्यति । लुप्यति । लोपिता । लुप्यतिः सेट्कः । अनिट्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव ग्रहणात् ।

124. √yupu, 125 √rupu, 126 √lupu, to trouble ; to efface ; to make level or smooth. Of these the √lupu is सेट्; the root लुप् mentioned in the aniṭ list is not this root, but the Tudâdi root लुप् as it is read along with √लिप of that class.

Pre. युप्यति । Per युयोप । 1 Fut. योपिता । II Fut. योपिष्यति । Impera. युप्यतु । Imper. अयुप्यत् । Poten. युप्येत् । Bene. युप्यात् । Aor. अयुपत् । Condi अयोपिष्यत् ।

125. √rupu,

Pre. रुप्यति । Per. रुरोप । I Fut. रोपिता । II Fut. रोपिष्यति । Impera. रुप्यतु । Imper. अरुप्यत् । Poten. रुप्येत् । Benedic. प्यात् । Aor. अरुपत् । Condi. अरोपिष्यत् ।

126. √lupu.

Pre. लुप्यति । Per. लुलोप । I Fut. लोपिता । II Fut लोपिष्यति । Impera. लुप्यतु । Imper. अलुप्यत् । Poten. लुप्येत् । Bene. लुप्यात् Aor. ।अलुपत् । Condi. अलोपिष्यत् ।

ष्टूप १२७ समुच्छ्राये ।

It is not given in the Siddhânta. It means “ to heap up to pile, to collect, to raise.”

लुभ १२८ गार्ध्ये ।

गार्ध्यमाकाङ्क्षा । 'तीषसह–' (२३४०) इति वेट् । लोभिता–लोब्धा । लोभिष्यति । लुभ्येत् । लुभ्यात् । अलुभत् । भ्वादेरवृत्कृतत्वाल्लोभतीत्यपीत्याहुः ।

128. √lubha, to covet, long for. The word 'gârdhyam' means 'greed'. It is optionally वेट् by S. 2340. As the word, वृत् 'finished,' is not used at the end of Bhuâdi class, as it is used at the end of other classes, every root can be conjugated in the Bhuâdi class, as that list is not exhaustive. Therefore लुभ forms लोभते also in the Bhuâdi class. This is the opinion of Atreya.

Pre. लुभ्यति । Per. लुलोभ । लुलोभिथ । I Fut. लोभिता or लोब्धा । II Fut. लोभिष्यति । Impera. लुभ्यतु । Imper. अलुभ्यत् । Poten. लुभ्येत् । Bene. लुभ्यात् । Aor. अलुभत् । Condi अलोभिष्यत् । Causa. लोभयति Aor. अलूलुभत् । Ger. लोभित्वा or लुभित्वा or लुब्ध्वा । Part. लुब्धः ।

क्षुभ १२९ संचलने ।

क्षुभ्यति ।

129. √kṣhubha, to be agitated or disturbed.

Pre. क्षुभ्यति । Per. चुक्षोभ ॥ I Fut. क्षोभिता । II Fut. क्षोभिष्यति । Impera. क्षुभ्यतु । Imper. अक्षुभ्यत् । Poten. क्षुभ्येत् । Bene. क्षुभ्यात् । Aor. अक्षुभत् or अक्षोभीत् ।

णभ १३० तुभ १३१ हिंसायाम् ।

क्षुभिनभितुभयो र्द्युतादौ क्र्यादौ च पठ्यन्ते । तेषां द्युतादित्वादङ् सिद्धः । क्र्यादित्वात्पक्षे सिज्भवत्येव । इह पाठस्तु श्यन्नर्थः ।

130. √ṇabha, 131 √tubha to injure, hurt, kill. The roots क्षुभ and णभ and tubha are in the Dyutâdi and Kryadi list, also (See Bhuâdi 787 &c.) and Kryâdi; they would have taken अङ् in the aorist by the fact of their being listed in the Dyutâdi; their inclusion in the Kryâdi class shows that the aorist is formed with सिच् also when it is considered to belong to that class. See Kryâdi No. 47 &c. Their inclusion therefore, here, is purely for the sake of श्यन् ।

Pre. नभ्यति । प्रणभ्यति । Per. ननाभ । नेभतुः । नेभिथ । नेभिव । I Fut. नभिता । Aor. अनभत् or अनभीत् or अनाभीत् ।

131. √tubha. The remarks applicable to √kshubha and √ṇabha apply to this also.

Pre. तुभ्यति । Per. तुतोभ । I Fut. तोभिता । II Fut. तोभिष्यति । Impera. तुभ्यतु । Imper. अतुभ्यत् । Poten. तुभ्येत् । Bene. तुभ्यात् । Aor. अतुभत् । Condi. अतोभिष्यत् ।

क्लिदू १३२ आर्द्रीभावे ।

क्लिद्यति । चिक्लेदिथ–चिक्लेत्थ । चिक्लिदिव–चिक्लिद्व । चिक्लिदिम–चिक्लिद्म । क्लेदिता–क्लेत्ता ।

132. √klidû, to become wet, be damp, moist.

Pre. क्लिद्यति । Per. चिक्लेद । चिक्लेदिथ or चिक्लेत्थ । चिक्लिदिव or चिक्लिद्व । चिक्लिदिम or चिक्लिद्म । I Fut. क्लेदिता or क्लेत्ता । II Fut. क्लेदिष्यति or क्लेत्स्यति । Impera.

क्लिद्यतु । Imper. अक्लिद्यत । Poten. क्लिद्येत । Bene. क्लिद्यात् । Aor. अक्लिदत् । Condi. अक्लिदिष्यत् or अक्लित्स्यत् । Causa. क्लेदयति Aor. अचिक्लिदत् । Des. चिक्लिदिषति । चिक्लित्सति । Inten. चेक्लिद्यते । yañluk चेक्लेत्ति । Part. Pass. क्लिन्नः । Act. क्लिन्नवान् । Ger. क्लिदित्वा or क्लेदित्वा ।

ञिमिदा १३३ स्नेहने ।

'मिदेर्गुणः' (२३४६) । मेद्यति । अमिदत् । द्युतादिपाठादेवामिदत् । अमेदिष्टेति सिद्धे इह पाठोऽमेदीदिति मा भूदिति । द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तूचितः ।

133. √ñi midâ, to be unctuous or greasy, to love. This root would have formed its aorist with अङ् by the very fact of its being included in the Dyutâdi class (See Bhuâdi 777 to 799). The aorist would be अमिदत् and अमेदिष्ट there under. Its inclusion here indicates that it never takes चिण्, and we can never have the form अमेदीत् । If this be so, its inclusion there is problematic. For it would have formed अमिदत् under Pushâdi. The better arrangement would have been, not to read it in the Dyutâdi class, but in the atmanepadi class any where else of the Bhuvâdi, to give us the form अमेदिष्ट ।

Pre मेद्यति । The vowel is gunated by S. 2346. Per. मिमेद । मिमेदिथ । I Fut. मेदिता । II Fut. मेदिष्यति । Impera. मेद्यतु । Imper. अमेद्यत् । Poten. मेद्येत् । Bene. मिद्यात् । Aor. अमिदत् । Desi. मिमिदिषति । मिमेदिषति । Ger. मेदित्वा or मिदित्वा ।

ञिक्ष्विदा १३४ स्नेहनमोचनयोः ।

134. √ñi kshvidâ 1. to be greasy or unctuous, love; 2. to release. It is in the Bhvadi also. See No. 780.

Pre. क्ष्विद्यति । Per. चिक्ष्वेद । I Fut. क्ष्वेदिता । II Fut. क्ष्वेदिष्यति । Impera. क्ष्विद्यतु । Imper. अक्ष्विद्यत् । Poten. क्ष्विद्येत् । Bene. क्ष्विद्यात् । Aor. अक्ष्विदत् । Condi. अक्ष्वेदिष्यत् ।

ऋधु १३५ वृद्धौ ।

आनर्ध । आर्धत् ।

135. √ṛidhu to prosper, grow, increase. This root is found in the Svâdi also. See No. 24.

Pre. ऋध्यति । Per. आनर्ध । आनृधतुः । आनर्धिथ । आनर्धिव । I. Fut. अर्धिता । II Fut. अर्धिष्यति । Impera. ऋध्यतु । Imper. आर्ध्यत् । Poten. ऋध्येत् । Bene. ऋध्यात् । Aor. आर्धत् । (The real form is ऋधत् without the augment अ as in मा भवान् ऋधत् ।) Condi. आर्धिष्यत् । Causa. अर्धयति । Aor आर्दिधत् । Desi. अर्दिधिषति or ईर्त्सति । VII. 2. 49. S. 2318. Past. Part. ऋद्धः । Ger. अर्धित्वा or ऋद्ध्वा ।

गृधु १३६ अभिकाङ्क्षायाम् ।

अगृधत् । वृत् । पुषादयो दिवादयश्च वृत्ताः । केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणम् । दिवादिस्तु भ्वादिवदाकृतिगणः । तेन क्षीयते सूयतीत्यादि सिद्धिरित्याहुः ।

136. √gṛidhu, to covet. desire, to be greedy.

Pre. गृध्यति । Per. जगर्ध । जगृधतुः । जगर्धिथ । जगृधिव । I Fut. गर्धिता । II Fut. गर्धिष्यति । Impera. गृध्यतु । Imper. अगृध्यत् । Poten. गृध्येत् । Bene. गृध्यात् । Aor. अगृधत् । Condi. अगर्धिष्यत् । Causa. गर्धयति or ते (I. 3. 69. S. 2739). Desi. जिगर्धिषति । Inten. जरीगृध्यते । yañ luk जगर्धीति । Ger. गर्धित्वा or गृद्ध्वा । Nouns: गृध्नुः । गर्धनः । गृध्रः ।

वृत् । Finish. According to Atreya and Maitreya the Divâdi and Pushâdi reach their completion here. Others hold that the word vṛit applies to Pushâdi only. There is no end to Divâdi class. It is an Akritigaṇa like the Bhvâdi. And thus the forms क्षीयते and मृग्यति &c. ar explained by them.

मृग १३७ अन्वेषणे ।

137 √. mṛiga, to seek, search for.

Pre. मृग्यति ।

इति तिङन्तदिवादिप्रकरणम् ।

अथतिङन्त स्वादि प्रकरणम् ।

CHAPTER V.

THE SU-CLASS VERBS.

षुञ् १ अभिषवे ।

अभिषवः स्नपनं पीडनं स्नानं सुरासंधानं च । तत्र स्नानेऽकर्मकः ।

The first root of this class is —

1. √shuñ to bathe. The word abhiṣhava here means to make one bathe, to squeeze, to bathe, and to distil spirituous liquor. It is intransitive in the sense of bathing.

Thus सु+शप्+ति । Now applies the following sûtra by which the vikaraṇa श्नु comes after these verbs instead of शप् ।

२५२३ । स्वादिभ्यः श्नु । ३ । १ । ७३ ।

सुनोति । सुनुतः । 'हुश्नुवोः-' (२३८७) इति यण् । सुन्वन्ति । सुन्वः-सुनुवः । सुन्वहे-सुनुवहे । सुषाव-सुषुवे । सोता । सुनु । सुनवानि । सुनवै । सुनुयात् । सूयात् । 'स्तुसुधूञ्भ्यः-' (२३८५) इतीट् । असावीत्-असोष्ट । अभिषुणोति । अभ्यषुणोत् । अभिसुषाव ।

2523. The affix श्नु comes after the roots of Svâdi class when a sârvadhâtuka affix denoting an agent follows.

This debars शप्. As सु+श्नु+तिप्=सु+नु+ति=सुनोति 'he presses out'. The dual is सुनुतः । The plural is सुनु+अन्ति=सुन्वन्ति । Here व is substituted for उ by VI. 4. 87 S. 2387. The First Person dual is सुन्वः or सुनुवः by VI. 4. 107 S 2333. The âtmanepadi dual is सुन्वहे or सुनुवहे । In the aorist there is इट् by VII. 2. 72. S. 2385. As असावीत् ।

The स is changed to ष after an alterant preposition (VIII. 3. 65. S. 2270). As अभिषुणोति। But not in अभिसुषाव because of the implied prohibition of VIII. 3. 64 S 2277. Nor is स changed in the Second Future and Desiderative, because of the following.

२५२४। सुनोतेः स्यसनोः। ८। ३। ११७।

स्ये सनि च परे सुञः षो न स्यात्। विसोष्यति।

2524. The स् of सु (सुनोति) is not changed to ष् in the Future, Conditional and Desiderative.

Thus:—अभिसोष्यति, परिसोष्यति, अभ्यसोष्यत, पर्यसोष्यत॥

1. √ṣhu, to press out or extract juice; to distil. Parasmaipada.

Pre. सुनोति। सुनुतः। सुन्वन्ति। सुनोषि। सुनोमि। सुनुवः। सुन्वः। Per. सुषाव। सुषुवतुः। सुषोथ or सुषविथ। सुषुवथुः। सुषुव। सुषाव or सुषव। सुषुविव। I Fut. सोता। II Fut. सोष्यति। Impera. सुनोतु। सुनुतात्। सुनुताम्। सुन्वन्तु। सुनु। सुनुतम्। सुनुत। सुनवानि। Imper. असुनोत्। असुनुताम्। असुन्वन्। असुनोः। असुनवम्। असुन्व or असुनुव। Poten. सुनुयात्। सुनुयाताम्। सुनुयुः। सुनुयाः। सुनुयाम्। Bene. सूयात् सूयास्ताम्। Aor. असावीत्। असाविष्टाम्। असावीः। असाविषम्। Condi. असोष्यत्। Causa. सावयति। Aor. असूषुवत्। Desid. सुसूषति। Inten सोषूयते। yanluk. सोषुवीति or सोषोति। d. सोषुतः। Nouns:—राजसूयः। आसाव्यम्। सुत्वरी। सुत्या। सुरा। सुरकः।

1. ṣhuñ, to press out or extract juice, to distill. Atmanepada.

Pre. सुनुते। सुन्वाते। सुन्वते। सुनुषे। सुन्वे। सुनुवहे सुन्वहे। Per सुषुवे। सुषुविषे। सुषुविढ्वे सुषुविध्वे। सुषुवे। सुषुविवहे। सुषुविमहे। I Fut सोता। II Fut. सोष्यते। Impera. सुनुताम्। सुन्वाताम्। सुन्वतां। सुनुष्व। सुनवै। सुनवावहै। Imper. असुनुत। असुन्वाताम्। असुन्वत। असुनुथाः। असुन्वि। असुन्वहि। असुनुवहि। Poten. सुन्वीत। सुन्वीयाताम्। Bene. सोषीष्ट। सोसीयास्ताम्। सोषीढ्वम्। Aor. असोष्ट। असोषाताम्। असोष्टाः। असोषि। Condi. असोष्यत।

षिञ् २ बन्धने।

सिनोति। विसिनोति। सिषाय-सिष्ये। सेता।

2. √ṣhiñ. To bind. Parasmaipada.

Pre. सिनोति। सिनोषि सिनोमि। सिनुवः सिन्वः। Per. सिषाय। सिष्यतुः। सिषयिथ or सिषेथ। सिष्य। सिषाय or सिषय। सिष्यिव। I Fut. सेता। II Fut. सेष्यति। Impera सिनोतु। सिनु। सिनवानि। Imper. असिनोत्। Poten. सिनुयात्। Bene. सीयात्। Aor. असैषीत्। असैष्टाम्। Condi. असेष्यत्। Pass. सीयते। Causa. साययति। Aor. असीषयत्। Desid. सिसीषति or ते। Inten. सेषीयते। yaiiluk. सेषयीति or सेषेति। Part. Pass. सितः। Act. सितवान् Nouns:—सैरिकः। सेतु। सिता। सेरुः। सिनः। असिता सेत्रम्। परिषितः। परिषयः।

2. √ṣhiñ to bind, fasten. Atmanepada.

Pre. सिनुते। सिनुषे। सिन्वे। सिन्वहे or सिनुवहे। Per. सिष्ये। सिष्यिषे। सिष्यिवहे। I Fut. सेता। II सेष्यते। Impera. सिनुताम्। सिनुष्व। सिनवै। Imper. असिनुत। असिनुथाः। असिन्वि। असिन्वहि or असिनुवहि। Poten.। सिन्वीत। Bene. सेषीष्ट। Aor. असेष्ट। असेषाताम्। Condi. असेष्यत.

शिञ् ३ निशाने ।

तालव्यादिः । शेता ।

3. √śiñ, to whet, to sharpen. Parasmaipada.

Pre. शिनोति । Per. शिशाय । I Fut. शेता । II Fut. शेष्यति । Impera. शिनोतु । Imper. अशिनोत् । Poten. शिनुयात् । Bene. शीयात् । Aor. अशैषीत् ।

3. √śiñ, to whet, sharpen. Atmanepada.

Pre. शिनुते । Per. शिश्ये । I Fut. शेता । II Fut. शेष्यते.

डुमिञ् ४ प्रक्षेपणे ।

'मीनातिमिनोति-' (२५०८) इत्यात्वम् । ममौ । ममिथ-ममाथ । मिम्ये । माता । मीयात् । मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ।

4. √ḍu miñ, to throw, cast, scatter. Parasmaipada.

Pre. मिनोति । Per. ममौ (S. 2508). मिम्यतुः । मिम्युः । ममिथ or ममाथ । मम्यथुः । मम्य । ममौ । मिम्यिव । मिम्यिम । I Fut. माता । II Fut. मास्यति । Impera. मिनोतु । मिनु । मिनवानि । Imper. अमिनोत् । अमिनुतम् । Poten. मिनुयात् । Bene. मीयात् । Aor. अमासीत् । अमासिष्टाम् । Condi. अमास्यत् । Causa. मापयति । Aor. अमीमपत् । Desid. मित्सति । Inten. मेमीयते । yañluk मेमेति । मेमयीति । Nouns: मित्रिमम्, मीरः, प्रमयः

4. √ḍu miñ. Atmanepada.

Pre. मिनुते । Per. मिम्ये । मिम्यिषे । मिम्यिवहे । I Fut. माता । II Fut. मास्यते । Impera. मिनुताम् । मिनुष्व । मिनवै । Imper. अमिनुत । Poten. मिन्वीत । Bene मासीष्ट । Aor. अमास्त । अमासाताम् । Condi. अमास्यत ।

चिञ् ५ चयने ।

प्रणिचिनोति ।

5. √chiñ, to collect. The Present 3rd person is चिनोति । The preposition नि is changed to णि as प्रणिचिनोति (VIII. 4. 17 S. 2285). In the Perfect, the च is optionally changed to क by the following :—

२५२५ । विभाषा चेः । ७ । ३ । ५८ ।

अभ्यासात्परस्य चिञः कुत्वं वा स्यात्सनि लिटि च । प्रणिचिकाय । चिचाय-चिक्ये-चिच्ये । अचैषीत्-अचेष्ट ।

2525. A guttural is optionally substituted for the च् of चि after a reduplication in the Desiderative and Perfect.

As चिचीषति or चिकीषति, चिचाय or चिकाय ॥ But चेचीयते in other cases.

5. √chiñ, to collect. Parasmaipada.

Pre. चिनोति Per. चिकाय or चिचाय । चिक्यतुः or चिच्यतुः । चिकयिथ or चिकेथ or चिचयिथ or चिचेथ । चिक्यिव । or चिच्यिव । I. Fut. चेता । II Fut. चेष्यति । Impera. चिनोतु । चिनुताम् । Imper. अचिनोत् । Poten. चिनुयात् । Bene. चीयात् । Aor. अचैषीत् । Condi. अचेष्यत् । Causa. चापयति । चाययति । Desi. चिचीषति । चिकीषति । Inten. चेचीयते चेकीयते । yañluk. चेचेति । Past Pass. चितः । Act. चितवान् । चेयम् Nouns :—निकाय्यः । संचाय्यः । परिचाय्यः । उपचाय्यः । अग्निचित् । श्येनचित् । निश्चयः । द्याचितीनः । पुष्पप्रचायः । फलप्रचयं । कायः । द्याचितिकः । गोमय निकायः । भिक्षुनिकायः । चितिः । द्विचितीकः । आचितीनः । द्याचितः । आचितकः । आचितः । चित्रम् ।

5. √chiñ, to collect. Atmanepada.

Pre. चिनुते । Per. चिक्ये or चिच्ये I Fut. चेता । II Fut. चेष्यते । Impera, चिनुताम् । Imper. अचिनुत । Poten. चिन्वीत । Bene. चेषीष्ट । Aor. अचेष्ट ।

स्तृञ् ६ आच्छादने ।

स्तृणाति । स्तृणुते । 'गुणोऽर्ति–' (२३८०) इति गुणः । स्तर्यात् ।

6. √stṛiñ, to cover. The Present is स्तृणोति । Atm. स्तृणुते । In the Potential there is guṇa by S. 2380. As स्तर्यात् । In the âtmanepada, the इट् is optional in the Benedictive and Aorist by the following.

२५२६ । ऋतश्च संयोगादेः । ७ । २ । ४३ ।

ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड्वा स्यात्तङि । स्तरिषीष्ट–स्तृषीष्ट । अस्तरिष्ट–अस्तृत ।

2526. The इट् is opitionally added to the endings of the Atmanepada Benedictive and S-Aorist, after a root, which ends in short ऋ, which is preceded by a conjunct consonant.

As स्तरिषीष्ट or स्तृषीष्ट । Aor. अस्तरिष्ट or अस्तृत ।

Note:—Why ending in short ऋ ? Observe च्योषीष्ट, अच्योष्ट, प्लोषीष्ट and अप्लोष्ट ॥ Why 'beginning with a conjunct consonant,? Observe कृषीष्ट, हृषीष्ट, अकृत and अहृत ॥ Why 'in the Atmanepada'? Observe अध्वार्षीत्, अस्मार्षीत् ॥ In संस्कृषीष्ट and समस्कृत there is not इट्, first because स्कृ (the form assumed by कृ with सुट् augment) is not so enunciated in the Dhâtupaṭha; the word upadeśa of VII. 2. 10, is understood here; so that the rule applies to those roots only which in the Dhâtupâṭha are ऋ ending and preceded by conjunct consonant; and secondly सुट् augment is considered as not attached to the root (VI. 1. 135), and therefore स्कृ is not considered a root beginning with a conjunct consonant.

6. √stṛiñ, to cover. Parasmaipada.

Pre. स्तृणोति । स्तृणुतः । स्तृण्वन्ति । स्तृणोषि । स्तृणोमि । स्तृण्वः or स्तृणुवः । स्तृणुमः or स्तृण्मः । Per. तस्तार । तस्तरतुः । तस्तरुः । तस्तर्थ । तस्तर । तस्तार or तस्तर । तस्तरिव । I Fut. स्तर्ता । II Fut. स्तरिष्यति । Impera. स्तृणोतु । स्तृणु । स्तृणवानि । Imper. अस्तृणोत् । Poten. स्तृणुयात् । Bene. स्तर्यात् । Aor. अस्तार्षीत् । अस्तार्ष्टाम् । Condi. अस्तरिष्यत् । Pass. स्त्रियते । Causa. स्तारयति । Aor. अतिस्तरत् । Desid. तिस्तीर्षति । Inten. तास्तर्यते । yanluk तस्तर्ति । तस्तरीति । Pass. स्तृतः । Act. स्तृतवान् । Ger. स्तृत्वा

6. √stṛiñ, to cover. Atmanepada.

Pre. स्तृणुते । स्तृणुषे । स्तृण्वे । Per. तस्तरे । तस्तराते । तस्तरिषे । तस्तरिढ्वे तस्तरिध्वे । तस्तरे । तस्तरिवहे । I Fut. स्तर्ता । II Fut. स्तरिष्यते । Impera. स्तृणुताम् । स्तृणुष्व । स्तृणवै । Imper. अस्तृणुत । Poten. स्तृण्वीत । Bene. स्तृषीष्ट or स्तरिषीष्ट । Aor. अस्तृत or अस्तरिष्ट । अस्तृषाताम् or अस्तरिषाताम् । Condi. अस्तरिष्यत ।

कृञ् ७ हिंसायाम् ।

कृणोति–कृणुते । चकार । चकर्थ । चक्रे । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत ।

7. √kṛiñ, to hurt, injure, kill. Parasmaipada.

Pre. कृणोति। Per. चकार। चक्रतुः। चकर्थ। चकृव। चकार or चकर। चकृम। I Fut. कर्ता। II Fut. करिष्यति। Impera कृणोतु। Imper. अकृणोत्। Penen. कृणुयात्। Bene. क्रियात्। Aor. अकार्षीत्। अकार्ष्टाम्। Causa. कारयति। Aor अचीकरत्। Desid. चिकीर्षति। Inten. चेक्रीयते। yanluk चरीकर्ति।

7. √kṛiñ. Atmanepada.

Pre. कृणुते। Per. चक्रे। चक्राते। चकृषे। चकृढ्वे। चक्रे। चकृवहे। I Fut. कर्ता। II Fut. करिष्यते। Impera. कृणुताम्। Imper. अकृणुत। Poten. कृण्वीत। Bene. कृषीष्ट। Aor. अकृत। अकृषाताम्। Desid. चिकीर्षते।

वृञ् ८ वरणे।

8. √vṛiñ to choose, select. In the Perfect, 2nd person singular the augment इट् is optional by the nipâtan of the following sûtra.

२५२७। बभूथाततन्थजगृम्भववर्थेति निगमे। ७। २। ६४।

एषां वेदे इडभावो निपात्यते। तेन भाषायां थलीट्। ववरिथ। ववृव। ववृवहे। वरिता-वरीता।

2527. In the Veda are found the irregular forms babhûtha, âtatantha, jagṛimbha, and vavartha.

As त्वं हि होता प्रथमो बभूथ (=बभूविथ); येनान्तरिक्षमुर्वाततन्थ (=आतेनिथ); जगृम्भा ते दक्षिणमिन्द्र हस्तम् (=जगृहिम), ववर्थ त्वं हि ज्योतिषा (=ववरिथ). See VII. 2. 13. This is also a niyama rule with regard to वृ, for by VII. 2. 13 the root वृ was already aniṭ, and its Perfect would have been ववर्थ by that rule. The special mention of this form shows that in classical literature this root is always वेट् before थ of the Perfect.

Therefore we have in classical literature ववरिथ with the थल् affix. In the First Future we have वरिता or वरीता। The lengthening is by VII. 2. 38. S. 2391.

The इट् augment is optional in the âtmanepada Benedictive and Aorist by the following:—

२५२८। लिङ्सिचोरात्मनेपदेषु। ७। २। ४२।

वृङ्वृञ्भ्यामॄदन्ताच्च परयोर्लिङ्सिचोरिड्वा स्यात्तङि।

2528. The इट् is optionally added to the endings of the Atmanepada Benedictive and s-Aorist, after vṛi and roots ending in long ṝ (ॠ).

Thus the Benedictive is वृषीष्ट। But when इट् is added, we have the following equation: वृ+इ+स्+स्त= वर्+इ+स्+ई+स्त। Now VII. 2. 38 S. 2391 requires the lengthening of the short इ। This is prevented by the following.

२५२९। न लिङि। ७। २। ३९।

वृतो लिङि इटो दीर्घो न स्यात्। वरिषीष्ट-वृषीष्ट। अवारीत्। अवरिष्ट-अवरीष्ट-अवृत।

2529. The इट् is not lengthened after the root वृ and ॠ ending radicals in the Benedictive.

As वरिषीष्ट,

8. √vṛiñ, to choose, select. Parasmaipada.

Pre. वृणोति । Per. ववार । वव्रतुः । ववरिथ । वव्रु । ववार or ववर । ववृव । I Fut. वरिता or वरीता । II Fut. वरिष्यति or वरीष्यति । Impera वृणोतु । वृणुतात् । Imper. अवृणोत् । Poten. वृणुयात् । Bene. व्रियात् । Aor. अवारीत् । अवारिष्टाम् । Condi. अवरिष्यत् । अवरीष्यत् । Pass. व्रियते । Aor. अवारि । Causa. वारयति । Aor. अवीवरत् । Desid. वुवूर्षति । विवरिषति । विवरीषति । Inten. वेवीर्यते । yaṅ luk. वर्वर्ति । Nouns:— वृत्यः । वारणम् । वार्या । पतिंवरा । निवरा । वरुणानी । वारुणी ।

8. √vṛiñ, to select, choose. Atmanepada.

Pre. वृणुते । Per. वव्रे । ववृषे । ववृढ्वे । ववृवहे । I Fut. वरिता or वरीता । II Fut. वरिष्यते or वरीष्यते । Impera. वृणुताम् । Impe' अवृणुत । Poten. वृण्वीत । Bene. वृषीष्ट or वरिषीष्ट । Aor. अवृत or अवरिष्ट । अवरीष्ट । अवृषाताम् or अवरिषाताम् or अवरीषाताम् । अवृध्वम् । अवरिध्वम् । अवरीध्वम् । अवरिढ्वम् । अवरीढ्वम् । Condi. अवरिष्यत । अवरीष्यत । Causa. वारयति । अवीवरत् । Desid. वुवूर्षते । विवरिषति । विवरीषति । Inten. वेवीयेते । Nouns : वृत्यः । वार्या । वरा । वारणम् । वृत्तम् । नीवारः । निवरः । प्रावरः प्रवरः । प्रवरा । वर्म । वर्मी । वार्म्मिकायणिः । वरूथः । वर्षम् । वर्णः । वर्णी । ब्रह्मवर्णी । वरुणः । वरुणानी । मैत्रावरुणः । वरुणदत्तः । वार्णिकः । वरुणिल । वरुणदत्तकः । वरुः । वरत्री ।

धुञ् ९ कम्पने ।

धुनोति-धुनुते । अधौषीत् । अधोष्यत् । दीर्घान्तोऽप्ययम् । धूनोति-धूनुते । 'स्वरतिसूति-' (२२७९) इति वेट् । दुधविथ-दुधोथ । किति लिटि तु 'श्र्युकः-' (२३८१) इति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट् । दुधुविव । 'स्तुसुधूञ्भ्यः-' (२३८५) इति नित्यमिट् । अधावीत्-अधविष्ट-अधोष्ट ।

9. √dhuñ, to tremble, shake. This root is taught with long ऊ also, as धूञ् । It will be optionally वेट् as it is specifically mentioned in the sûtra VII. 2. 44. S. 2279. As दुधविथ or दुधोथ । In other terminations of the कित् Perfect the इट् augment is compulsory, because the prohibition of VII. 2. 11. S. 2381 is superseded by VII. 2. 13. S. 22 93. As दुधुविव । The P. Aor. is अधावीत् । The इट् here is compulsory under VII. 2. 72. S. 2385.

Pre. धुनोति । Per. दुधाव । दुधविथ or दुधोथ । I Fut. धोता । धोतासि । II Fut. धोष्यति । Impera. धुनोतु । Imper. अधुनोत् । अधुनुताम् । Poten. धुनुयात् । Bene. धूयात् । Aor. अधौषीत् । Condi. अधोष्यत् । Causa. धावयति । Aor. अदूधवत् । Desid. दुधूषति । Inten दोधूयते । yaṅluk. दोधोति । Parti. धुतः । Ger. धुत्वा । Nouns: धुनिः ।

9. √dhuñ. Atmanepada.

Pre. धुनुते । Per. दुधुवे । दुधुविषे । I Fut. धोता । धोतासे । II Fut. धोष्यते । Impera. धुनुताम् । Imper अधुनुत । Poten. धुन्वीत । Bene. धोषीष्ट । Aor. अधोष्ट । Condi. अधोष्यत । Desid. दुधूषते ।

9. (*a*) धूञ् √dhûñ. This dhûñ is found in the Kryâdi class and Yujâdi also. The root dhû without ञ् is in the Tudâdi also.

Pre. धूनोति। A. धूनुते। Per. दुधाव A. दुधुवे। दुधविथ or दुधोथ। दुधुविव। I Fut. धोता or धविता। II. Fut. धोष्यति or धविष्यति। A. धोष्यते or धविष्यते। Impera. धूनोतु or धूनुतात्। Imper. अधूनोत्। Poten. धूनुयात्। A. धून्वीत। Bene. धूयात्। A. धोषीष्ट or धविषीष्ट। Aor. अधावीत्। अधाविष्टाम्। A. अधोष्ट or अधविष्ट। Causa. धूनयति (See Vârtika under S. 2572 for न). Desid. दुधूषति। Past Part. धूतः। Ger. धूत्वा।

The following roots are Parasmaipadins.

टुदु १० उपतापे।

दुनोति।

10. √ṭudu, to burn.

Pre. दुनोति। Per. दुदाव। I Fut. दोता। II Fut. दोष्यति। Impera. दुनोतु। Imper. अदुनोत्। Poten. दुनुयात्। Bene. दूयात्। Aor. अदौषीत्। Condi. अदोष्यत् Causa. दावयति। Aor. अदूदवत्। Desid. दुदूषति। Inten. दोदूयते। yaṅluk दोदोति। Parti. दुतवान्। Ger. दुत्वा। Noun: दावः। दवथुः।

हि ११ गतौ वृद्धौ च।

11. √hi, to go, 2. to promote.

Thus हिनोति। The न is changed to ण after an alterant preposition by the following sûtra.

२५३० । हिनु मिना । ८ । ४ । १५ ।

उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्यात्। प्रहिणोति।

2530. The न of हिनु and मीना is changed into ण, when coming after an upasarga containing in it a cause of change.

Thus प्रहिणोति। (प्रहिणुतः, प्रमीणाति, प्रमीणीतः) ॥

Note:—The root हि belongs to the Svâdi class of verbs and takes the vikaraṇa नु technically श्नु; and the root मी belongs to Kṛyâdi class which takes the vikaraṇa श्ना ॥ In the sûtra the verbs are shown with the vikaraṇas affixed. Under certain circumstances the forms of the vikaraṇa is changed from नु to नो and ना to नी, but the rule still applies, because the substitute of an अच् or vowel is like the principal. See I. 1. 57.

In forming the Perfect we have हि+णल्=जिहि+अ। Now applies the following sûtra by which the ह is changed to घ।

२५३१ । हेरचङि । ७ । ३ । ५६ ।

अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि। जिघाय।

2531. A guttural is substituted for the ह of हि (हिनोति) after a reduplication, but not in the Reduplicated Aorist (चङ्)।

As प्रजिघाय but प्राजीहयद् दूतम् in the Reduplicated Aorist.

Obj. The word अचङि could be dispensed with from the sûtra, in as much as चङ् can never come after the simple root हि, but after the causative of हि, and the causative stem of हि is a different verb than, हि. Ans. The fact of this word अचङि being employed in the sûtra indicates the existence of the following maxim : प्रकृति ग्रहणे ण्यधिकस्यापि ग्रहणम् " A radical denotes whenever it is employed in Grammar, not only that radical itself, but it denotes also whatever stem may result from the the addition to it of the causative affix णि" ॥ Therefore we have प्रजिघाययिषति ॥

11. √hi, to go, promote.

Pre. हिनोति । Per. । जिघाय । जिघ्यतुः । जिघ्युः । जिघयिथ or जिघेथ । जिघ्य । जिघ्यिव । I Fut. हेता । II Fut. हेष्यति । Impera. हिनोतु । Imper. अहिनोत् । Poten. हिनुयात् । Bene. हीयात् । Aor. अहैषीत् । Condi. अहेष्यत् Causa. हाययति; Aor अजीहयत् । Desdi. जिघीषति । Inten. जेघीयते । yań luk जेघेति । Part. Pass. हितः । Act. हितवान् । Nouns :— हेतिः । हयः । हेतुः । संहितोरुः ।

पृ १२ प्रीतौ ।

पृणोति । पर्ता ।

12. √pṛi, to please or delight.

Pre. पृणोति । Per. पपार । पप्रतुः । पप्रुः । पपर्थ । पप्रथुः । पप्र । पपार or पपर । पप्रिव । पप्रिम । I Fut. पर्ता । II Fut. परिष्यति । Impera. पृणोतु । Imper. अपृणोत् । Poten. पृणुयात् । Bene. प्रियात् । Aor. अपार्षीत् । Condi. अपरिष्यत् Causa. पारयति Aor. अपीपरत् । Desid. पुपूर्षति । Inten. पेप्रीयते ।

स्पृ १३ प्रीतिपालनयोः ।

'प्रीतिचलनयोः' इत्यन्ये । 'चलनं जीवनम्' इति स्वामी । स्पृणोति । पस्पार । 'स्मृ' इत्येके । स्मृणोति । पृणोत्यादयस्त्रयोऽपि छान्दसा इत्याहुः ।

13. √spṛi ; to gratify, to protect. Another reading is 'prîti-chalanyoḥ' —'to gratify, to live'. The word 'chalana' here means 'living', according to Svâmî. Some read it as स्मृ √smṛi as स्मृणोति । The three roots pṛi, spṛi, and smṛi are Vaidic, according to some.

Pre. स्पृणोति । Per. पस्पार । पस्पर्थ । I Fut. स्पर्ता । II Fut. स्परिष्यति । Impera. स्पृणोतु । Imper. अस्पृणोत् । Poten. स्पृणुयात् । Bene. स्प्रियात् । Aor. अस्पार्षीत् । Condi. अस्परिष्यत् । Causa. स्पारयति । Desid पुस्पूर्षति । Inten. पेस्प्रीयते ।

आपॢ १४ व्याप्तौ ।

आप्नोति । आप्नुतः । आप्नुवन्ति । आप्नुवः । आप्ता । आप्नुहि । लृदित्वादङ् । आपत् ।

14. √apḷṛi, to pervade.

Pre. आप्नोति । आप्नुतः । आप्नुवन्ति । आप्नोषि । आप्नोमि । आप्नुवः । Per. आप । आपतुः । आपिथ । आपिव । I Fut. आप्ता । II Fut. आप्स्यति । Impera. आप्नोतु । आप्नुहि । आप्नवानि । Imper. आप्नोत् । Poten. आप्नुयात् । Bene. आप्यात् । Aor. आपत् । The aorist is formed by अङ् as the root has an indicatory लृ (III. 1. 55. S. 2343). Condi. आप्स्यत् । Causa. आपयति । Aor. मा भवान् आपिपत् । Desid. ईप्सति VII. 4. 55. S. 2619. Parti. Pass. आप्तः । Act. आप्तवान् । Nouns :—प्रापय्य आप्तिः । प्राप्तजीविकः । आपः । परीपम् । अन्तरीपम् । द्वैपायन ।

शकॢ १५ शक्तौ ।

अशकत् ।

15. √śakḷṛi, to be able.

Pre. शक्नोति । शक्नुतः । शक्नुवन्ति । Per. शशाक । शेकतुः । शेकुः । शशक्थ or शेकिथ । I Fut. शक्ता । II Fut. शक्ष्यति । Impera. शक्नोतु । शक्नुहि । Imper. अशक्नोत् । Poten. शक्नुयात् । Bene. शक्यात् । Aor. अशकत् Condi. अशक्ष्यत् । Desid. शिक्षते 'He desires to be able'. As धनुषि शिक्षते । See Vârtika under S. 2687. Past. Pass. शक्तः । शकितः । Act. शक्तवान् । शकितवान् । Nouns :—शक्रः । शकलम् ।

राध १६ साध १७ संसिद्धौ ।

राध्नोति ।

16. √râdha, to accomplish, 17 √sâdha, to accomplish. The Present is राध्नोति । In the Perfect, the reduplicate is elided, and ए substituted for आ by the following sûtra

२५३२ । राधो हिंसायाम् । ६ । ४ । १२३ ।

एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च । रेधतुः । रेधुः । रेधिथ । राद्धा । साध्नोति । साद्धा । असात्सीत् । असाद्धाम् ।

2532. The ए is substituted for the आ of राध when meaning 'to hurt some one', and the reduplicate is elided, before the affixes of the Perfect having an indicatory क् (or ङ्), as well as before थल् with the इट् augment.

Thus अपरेधतुः, अपरेधुः, अपरेधिथ, but रराधतुः, रराधुः, रराधिथ in any other senses than that of 'hurting.' In this sûtra the *long* आ of राध is to be replaced by ए, the anuvṛitti of short अ (अतः VI. 4. 120) is therefore not appropriate here. We should either read the anuvṛitti of आ from VI. 4. 112, or we should read the word एकहलमध्ये in this way " in राध् *whatever* stands between two simple consonants is replaced by ए".

16. √râdha, to accomplish, complete.

Pre. राध्नोति । राध्नुतः । राध्नुवन्ति । राध्नुवः । Per. रराध । रराधतुः or रेधतुः । रेधुः or रराधुः । रराधिथ or रेधिथ । I Fut. राद्धा । II Fut. रात्स्यति । Impera. राध्नोतु । राध्नुहि । Imper. अराध्नोत् । Poten. राध्नुयात् । Bene. राध्यात् Aor. अरात्सीत् । अराद्धाम् । अरात्सुः । Condi. अरात्स्यत् । Pass राध्यते । Causa. राधयति । Aor. अरीरधत् Desid. रिरात्सति । Inten. राराध्यते ।

17. √sâdha, to complete, finish.

Pre. साध्नोति । Per. ससाध । ससाधतुः । ससाधुः । ससाधिथ । ससाधिव I Fut. साद्धा । II Fut. सात्स्यति । Impera. साध्नोतु । Imper. असाध्नोत् । Poten. साध्नुयात् । Bene. साध्यात् । Aor. असात्सीत् । असाद्धाम् । Condi. असात्स्यत् । Causa. साधयति । Aor. असीषधत् । Desi.d सिषात्सति । Inten. सासाध्यते । yaniuk सासाद्धि । Nouns: साधुः साधनः

अथ द्वावनुदात्तेतौ

The two following roots are anudâttet.

अशू १८ व्याप्तौ संघाते च ।

अश्नुते ।

18. √aśû, to pervade. 2. to accumulate.

The Present is अश्नुते । In the Perfect, न is inserted after the long आ of the reduplicate, by the following sûtra.

२५३३ । अश्नोतेश्च । ७ । ४ । ७२ ।

दीर्घादभ्यासादवर्णात्परस्य नुट् स्यात् । आनशे । अशिता-अष्टा । अशिष्यते-अक्ष्यते । अश्नुवीत । अक्षीष्ट-अशिषीष्ट । आशिष्ट-आष्ट । आक्षाताम् ।

2533. After the lengthened आ of the reduplicate of अश् (अश्नोति), comes the augment नुट् (न्) before the short अ of the root in the Perfect.

This applies to a case where the root does not contain a double consonant. Thus व्यानशे, व्यानशाते, व्यानशिरे ॥ The rule applies to अश् of the Svâdi 18 and not to अश् of the Kryâdi 51 ; there we have आश, आशतुः, आशुः ॥

18. √aśû, 1. to pervade, 2. to heap, accumulate.

Pre अश्नुते । अश्नुवाते । अश्नुवते । अश्नुषे । अश्नुध्वे । अश्नुवे । अश्नुवहे । Per. आनशे । आनशाते । आनशिषे or आनक्षे । आनशिध्वे or आनड्ढ्वे । आनशिवहे or आनश्वहे । आनशिमहे or आनश्महे I Fut. अष्टा । अशिता । II Fut. अक्ष्यते । or अशिष्यते । Impera. अश्नुताम् । अश्नुष्व । Imper. आश्नुत । आश्नुथाः । आश्नुवि । Poten. अश्नुवीत । अश्नुवीथाः । Bene अशिषीष्ट । अक्षीष्ट । Aor. आशिष्ट or आष्ट । आशिषाताम् आक्षाताम् । Condi. आक्ष्यत । आशिष्यत । Causa. आशयते । Aor. आशिशत् । Desid. आशिशिषते । Inten. आशाश्यते । yañ luk आशष्टीति । Pass. अष्टः । Act. अष्टवान् । Ger. अष्ट्वा or अशित्वा । Nouns:—आश्विकः । आशुः । श्वशुरः । अक्षरम् । अशुम् । अश्वः । अक्षः । अक्षि । अश्रि ।

ष्टिघ १९ आस्कन्दने ।

स्तिघ्नुते । तिष्टिघे । स्तेघिता ।

19. √ṣhṭigha, to assail, attack.

Pre. स्तिघ्नुते । Per. तिष्टिघ्ने । I Fut. स्तेघिता । II Fut. स्तेघिष्यते । Impera. स्तिघताम् । Imper. अस्तिघत । Poten. स्तिघेत । Bene. स्तिघिषीष्ट । Aor. अस्तेघिष्ट । Condi. अस्तेघिष्यत । Causa. स्तेघयति Aor. अतिष्टिघत् । Desid. तिष्टिघिषते । तिष्टेघिषते । Inten. तेस्तिघ्यते yañ luk तेष्टिघीति or तेष्टेग्धि । Ger. स्तिघित्वा । स्तेघित्वा ।

अथ आ गणान्तात् परस्मैपदिनः ॥

All the roots up to the end of this class are Parasmaipadins.

तिक २० तिग २०.क । गतौ च ।

चादास्कन्दने । तिक्नोति । तिग्नोति ।

20. √tika 20(*a*) √tiga to go, **attack, assail.** By force of the letter च the meaning to assail is also taken here.

Pre. तिक्नोति । Per. तितेक । तितेकिथ । तितिकिव । I Fut. तेकिता । II Fut. तेकिष्यति । Impera. तिक्नोतु । Imper. अतिक्नोत् । Poten. तिक्नुयात् । Bene. तिक्यात् । Aor. अतेकीत् । Condi. । अतेकिष्यत् । Causa. तेकयति Aor. अतीतिकत् । तैकायनिः Desid. तितेकिषति । Inten. तेतिक्यते । yañ luk. तेतिकीति । Nouns:—तिकः तैकायनः । तिककितवाः ।

20. √tiga to go, to attack, assail.

Pre. तिग्नोति । Per. तितेग । I Fut. तेगिता । II Fut. तेगिष्यति । Impera. तिग्नोतु । Imper. अतिग्नोत् । Poten. तिग्नुयात् । Bene. तिग्यात् । Aor. अतेगीत् । Condi. अतेगिष्यत् । Causa. तेगयति । Desid. तितेगिषति । Inten. तेतिग्यते ।

षघ २१ हिंसायाम् ।

सघ्नोति ।

21. √shagha, to hurt, injure, kill.

Pre. सघ्नोति । Per. ससाघ । सेघतुः । सेघिथ । सेघिथ । I Fut. सघिता । II Fut. सघिष्यति । Impera. सघ्नोतु । Imper. असघ्नोत् । Poten. सघ्नुयात् । Bene. सघ्यात् । Aor. असाघीत् or असघीत् । Condi. असघिष्यत् । Causa. साघयति । Aor असीषघत् । Desid. सिषघिषति । Inten. सासघ्यते । yań luk. सासघीति । सासग्धि ।

ञिधृषा २२ प्रागल्भ्ये ।

धृष्णोति । दधर्ष । धर्षिता ।

22. √ñidhṛishâ, to be proud or over-bearing.

Pre. धृष्णोति । Per. दधर्ष । दधृषतुः । दधर्षिथ । दधर्षिथ । I Fut धर्षिता । II Fut. धर्षिष्यति । Impera. धृष्णोतु । Imper. अधृष्णोत् । Poten. धृष्णुयात् । Benedi धृष्यात् । Aor. अधर्षीत् । Condi. अधर्षिष्यत् । Causa. धर्षयति । Aor. अदीधृषत् । अदधर्षत् । Desid. दिधर्षिषति । Inten. दरिधृष्यते । yaṅ luk. दरीधृषीति । दरिधृष्टि । Part. Pass. धृष्टः । Act. धृष्टवान् । Ger. धर्षित्वा । Noun :— दधृक् ।

दम्भु २३ दम्भने ।

दम्भनं दम्भः । दभ्नोति । ददम्भ । 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वा' इति व्याकरणान्तरमिहाप्याश्रीयते इत्युक्तम् । 'अनिदिताम्–' (४१५) इति नलोपः । तस्याभीयत्वादसिद्धत्वेन एत्वाभ्यासलोपयोरप्राप्तौ । * दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ * । देभतुः । ददम्भतुः । इदं कित्वं पिदपिद्विषयकमिति सुधाकरादयः । तन्मते तिप्सिप्मिप्सु । देभ । देभिथ । 'देभ' इति रूपान्तरं बोध्यम् । अपिद्विषयकमिति न्यासकारादिमते तु । ददम्भ । ददम्भिथ । ददम्भेत्येव । दभ्यात् ।

23. √dambhu, to deceive, cheat, to injure, hurt. Thus the Present is दभ्नोति । Perfect ददम्भ । We have already mentioned under S. 2397, that according to a certain Grammar (?) the affixes of the Perfect are optionally कित् after the roots śranth, granth, dambh, and svañj. That rule is to be adopted here. The nasal is elided by S. 415. This elision being âbhîya (because taught by VI. 4. 24 which occurs in the subdivision of असिद्धवदत्राभात् VI. 4. 22. S. 2183), is asiddha and so there can be no ए change or elision of the reduplicate in the Perfect. Hence the following vartika. "The ए change and the elision of abhyâsa take place with regard to this root dambha by the sûtra VI. 4. 120 S. 2260." Thus देभतुः । When not कित्, we have ददम्भतुः ।

According to Sudhâkara and others the कित् taught by the above, applies to all affixes of the Perfect, whether they be पित् or non-पित् । In their opinion, even in the singulars तिप्, सिप् and मिप् we have देभ, देभिथ and देभ । According to Nyâsakâra and others, the कित् taught by the above rule is confined to non-पित् affixes; therefore the singulars are 3. ददम्भ, 2. ददम्भिथ and 1. ददम्भ।

Pre. दभ्नोति। The nasal is elided by S. 415. Per. ददम्भ or देभ। दभतुः or ददम्भतुः। ददम्भुः or देभुः।ददम्भिथ or देभिथ। देभथुः or ददम्भथुः। ददम्भ or देभ। ददम्भ or देभ। देभिव। I Fut. दम्भिता। II Fut. दम्भिष्यति। Impera. दभ्नोतु। Imper. अदभ्नोत्। Poten. दभ्नुयात्। Bene. दभ्यात्। Aor. अदम्भीत्। Condi. अदम्भिष्यत्। Causa. दम्भयति। Aor. अददम्भत्। Desid. दिदम्भिषति। धिप्सति। धीप्सति। VII. 4. 56. S. 2621. Inten. दादभ्यते। yań luk दादम्भि। Past Pass. दब्धः Act. दब्धवान्। Ger. दम्भित्वा or दब्ध्वा।

ऋधु २४ वृद्धौ।

24. √ṛidhu, to prosper, flourish, grow.

Pre. ऋध्नोति। Per. आनर्ध। आनृधतुः। आनर्धिथ। आनृधिव। I Fut. अर्धिता। II Fut. अर्धिष्यति। Impera. ऋध्नोतु। Imper. आर्ध्नोत्। Poten. ऋध्नुयात्। Bene. ऋध्यात्। Aor. ऋधत् as मा भवान् ऋधत्। Condi. आर्धिष्यत्। Causa. अर्धयति। Aor. आर्दिधत्। Desid. अर्दिधिषति or ईर्त्सति। Past. Pass. ऋद्ध। Ger. अर्धित्वा or ऋद्ध्वा।

तृप २५ प्रीणने।

क्षुभ्नादित्वाण्णत्वं न। तृप्नोति।

25. √tṛipa, to be pleased or satisfied. Some read this root here. The न is not changed to ण as it is considered to belong to the kshubhṇâdi class.

Pre. तृप्नोति। Per. ततर्प। ततृपतुः। ततर्पिथ or ततर्प्थ or तत्रप्थ। ततृपुः। ततृप। ततर्प। ततृपिव। I Fut. तर्पिता or तर्प्ता or त्रप्ता। II Fut. तर्पिष्यति or तर्प्स्यति or त्रप्स्यति। Impera. तृप्नोतु। Imper. अतृप्नोत्। Poten. तृप्नुयात्। Benedi. तृप्यात् Aor. अतर्पीत् or अतृपत्। अतर्प्सिष्टाम् or अतृपताम्।

२५३३। क। छन्दसि।

आ गणान्तादधिकारोऽयम्।

2533, A. The roots given here-after up to the end of the chapter are found employed in the Chhandas literature only.

This is an adhikâra gaṇa sûtra and exerts its influence up to the end of the chapter.

अह २६ व्याप्तौ।

अह्नोति।

26. √aha, to pervade.

Pre. अह्नोति।

दघ २७ घातने पालने च।

दघ्नोति।

27. √dagha, 1. to kill, hurt ; 2. to protect.

Pre. दघ्नोति ।

चमु २८ भक्षणे

चम्नोति ।

28. √chamu to eat.

Pre. चम्नोति ।

रि २९ क्षि ३० चिरि ३१ जिरि ३२ दाश ३३ दृ ३४ हिंसायाम् ।

रिणोति । क्षिणोति । अयं भाषायामपीत्येके । 'न तद्यशः शस्त्रभृतां क्षिणोति' । ऋक्षीत्येके स्वाजादिरित्यन्ये । ऋक्षिणोति । चिरिणोति । जिरिणोति । दाश्नोति । दृणोति । वृत् ।

29. √ri, 30 √kshi, 31 √chiri, 32 √jiri, 33 √dâśa, 34 √dṛi. to hurt kill.

Pre. रिणोति ।

30. √kṣhi to hurt, kill. Some say that this root is found in the ordinary Sanskrit also. As न तद् यशः शस्त्रभृतां क्षिणोति । Here kshiṇoti is used. So also इमां हृदि व्यायतपातमक्षिणोत् । Some read it as ऋक्षि, as ऋक्षिणोति, and do not read two root रि and क्षि separately, but *one* root ऋक्षि ।

Pre. क्षिणोति ।

31. √chiri to hurt, kill.

Pre. चिरिणोति ।

33. √jiri, to kill, hurt.

Pre. जिरिणोति ।

33. √dâś, to hurt, kill.

Pre. दाश्नोति ।

34. √dṛi, to hurt, kill.

Pre. दृणोति ।

वृत् । End.

इति तिङन्तस्वादिप्रकरणम् ।

Here end the roots of the Svâdi Class.

———:o:———

॥ अथतिङन्त तुदादि प्रकरणम् ॥

CHAPTER VI.

TUDADI ROOTS.

तुद १ व्यथने ।

इतः षट् स्वरितेतः ।

This class of verbs take the vikaraṇa श । The first root is तुद 'to torment'.

Thus तुद्+शप्+ति । Now applies the following sûtra by which श comes to the exclusion of शप् ।

२५३४ । तुदादिभ्यः शः । ३ । १ । ७७ ।

तुदति-तुदते । तुतोद । तुतोदिथ । तुतुदे । तोत्ता । अतौत्सीत्-अतुत्त ।

2534. The affix श is employed after the roots of the Tudâdi class, in denoting the agent when a sârvadhâtuka affix follows.

This debars शप्. The indicatory श makes this affix a sârvadhâtuka affix. As तुद+श+ति=तुद+अ+ति= तुदति (I. 2. 4) 'he pains or torments'.

The root तुद् and the six following roots are svaritet.

1. √tuda, to pain, vex, torment.

Pre. तुदति । तुदतः । तुदन्ति । तुदसि । तुदथः । तुदथ । तुदामि । तुदावः । तुदामः । Per. तुतोद । तुतुदतुः । तुतुदुः । तुतोदिथ । तुतुदथुः । तुतुद । तुतोद । तुतुदिव । तुतुदिम । I Fut. तोत्ता । II Fut. तोत्स्यति । Impera. तुदतु तुदतात् । तुदताम् । तुदन्तु । तुद or तुदतात् । तुदतम् । तुदत । तुदानि । तुदाव । तुदाम । Imper. अतुदत् । अतुदः । अतुदम् । Poten. तुदेत् । तुदेताम् । तुदेयुः । तुदेः । तुदेयम् । Bene. तुद्यात् । तुद्यास्ताम् । Aor. अतौत्सीत् । अतौत्ताम्। (VIII. 2. 26. S. 2281) अतौत्सीः । अतौत्सम् । Condi. अतोत्स्यत् । Causa. तोदयति । अतूतुदत् । Desid. तुतुत्सति । Inten. तोतुद्यते । yañ luk तोतुदीति or तोतोत्ति । Ger. तुत्वा । Nouns:—तुत्थम् तोत्रम् अरुंतुदः विधुंतुदः तिलंतुदः तुदती । तुदन्ती ।

Atm. Pre. तुदते । तुदेते । तुदन्ते । तुदसे । तुदेथे । तुदध्वे । तुदे । तुदावहे । तुदामहे । Per. तुतुदे । तुतुदाते । तुतुदिरे । तुतुदिषे । तुतुदाथे । तुतुदिध्वे । तुतुदे । तुतुदिवहे । तुतुदिमहे । I Fut. तोत्ता । II Fut. तोत्स्यते Impera. । तुदताम् । तुदेताम् । तुदन्ताम् । तुदस्व । तुदेथाम् । तुदध्वम् । तुदै । तुदावहै । तुदामहै । Imper. अतुदत । अतुदथाः । अतुदे । Poten. तुदेत । तुदेयाताम् । तुदेरन् । तुदेथाः । तुदेय । तुदेवहि । Bene. तुत्सीष्ट । तुत्सीयास्ताम् (I. 2 11. S. 2300). Aor. अतुत्त । अतुत्साताम् । Causa. तोदयते। Desid. तुतुत्सते ।

णुद् २ प्रेरणे ।

नुदति-नुदते । नुनोद-नुनुदे । नोत्ता ।

2. √ṇuda, to send.

Pre. नुदति । प्रणुदति or ते । Per. नुनोद । I Fut. नोत्ता । II Fut. नोत्स्यति । Impera. नुदतु । Imper. अनुदत् । Poten. नुदेत् । Bene. नुद्यात् । Aor. अनौत्सीत् । Condi. अनोत्स्यत् Causa. नोदयति Desid. नुनुत्सति । Inten. नोनुद्यते । Past Pass. नुन्नः । नुत्तः । Act. नुन्नवान् । नुत्तवान् । Ger. नुत्वा । Nouns : काकुदः । शोकापनुदः ।

Atm. Pre. नुदते । Per. नुनुदे । I Fut. नोत्ता । II Fut. नोत्स्यते । Impera. नुदताम् । Imper. अनुदत । Poten. नुदेत । Bene. नुत्सीष्ट । Aor. अनुत्त । Condi. अनोत्स्यत । Causa. नोदयते । Desid. नुनुत्सते ।

दिश ३ अतिसर्जने ।

अतिसर्जनं दानम् । देष्टा । दिक्षीष्ट । अदिक्षत्-अदिक्षत ।

3. √diśa, to give, grant, bestow.

Pre. दिशति । Per. दिदेश । दिदेशिथ । दिदिशिव । I Fut. देष्टा । II Fut. देक्ष्यति । Impera. दिशतु । Imper. अदिशत् । Poten. दिशेत् । Bene. दिश्यात् । Aor. अदिक्षत् ।

अदिक्षताम्। अदिक्षन्। अदिक्षः। Condi. अदेक्ष्यत् Causa. देशयति। अदीदिशत्। Desid. दिदिक्षति। Inten. देदिश्यते। yañ luk देदिशीति। देदेष्टि। Nouns:—दिक्। dual दिशौ pl. दिशः। प्रतिदिशम्। दिशा दिश्यम्। दैष्टिकः दिष्टिः देशः आदेशः प्रदेशिनी।

Atm. Pre. दिशते। Per. दिदिशे। दिदिशिरे। दिदिशिषे। दिदिशिवहे। I Fut. देष्टा। II Fut. देक्ष्यते। Impera. दिशताम्। Imper. अदिशत। Poten. दिशेत। Bene. दिक्षीष्ट। Aor. अदिक्षत। अदिक्षाताम्। अदिक्षथाः। अदिक्षि। अदिक्षावहि। Desid. दिदिक्षते।

भ्रस्ज ४ पाके।

'ग्रहिज्या–' (२४१२) इति संप्रसारणम्। सस्य श्चुत्वेन शः। शस्य जश्त्वेन जः। भृज्जति-भृज्जते।

4. √bhrasja, 'to cook'.

